भूमिकप्रासादेप्रान्तगतां मुग्धैस्वभावां त्वां वासुदेवं मन्यमानां स्वकीयमिथ्यावैकक्किभी[1]रुजयित्वा वात्स्यायनोक्तविधिना भज । कौलिकोपि तदाकर्ण्य वासुदेवरूपी रहस्यदा गत्वा तत्र तामाह । राजपुत्रि सुप्ता किंवा जागर्षि । अहं तव कृते समुद्रात्सार्नुरंगो लक्ष्मीं विहायैवागतः । तत्किंयतां मया सह संगमं इति । सापि गरुडारूढं चतुर्भुजं सायुधं कौस्तुभोपेतमवलोक्य सविस्मया शयनादुत्थाय प्रोवाच । भगवन् अहं मानुषी कीटिकाऽतिचिरभगवत्सेवोपयुक्तोपवनो वन्दनीयश्च । तत्कथमेतद्युज्यते । कौलिक आह । सुभगे सत्यमभिहितं भवत्या परं किंतु राधा नाम मे भार्या गोपकुलप्रसूता प्रथममासीत । सा त्वमत्रावतीर्णा । तेनाहमायातः । इत्युक्ता सा प्राह । भगवन्यद्येवं तन्मे तात प्रार्थय । सोप्युपकर्ण्य तुभ्यं भां प्रयच्छति । कौलिक आह । सुभगे नाहं दर्शनपथं मानुषाणां गच्छामि किं पुनरालापकरणम । त्वं गान्धर्वेण विवाहेनात्मानं प्रयच्छ नो चेच्छापं दत्त्वा सान्वयं ते पितरं भस्मसात्करिष्यामीति । एवम-

---

१ Living on the top of the palace seven stories high. मनुष्यकीटसमात्. क. २ Of an artless disposition. ब. ३ By false and equivocal terms or expressions. ४ According to the mode pre-scribed by *Vātsyāyana*, an author on कामशास्त्र. ५ In the di-guise of Vāsudeva. ६ Full of love. ७ चतुर्भुज = चत्वारो भुजा यस्य त. ब. ८ With weapons. ९ A worm, a term used contemptuously for a human being १० Purifying the three worlds. ११ एतत्, *viz.*, the fact that I should have intercourse with you. १२ Oh fortunate or beautiful one १३ Born in the family of cow-herds. १४ That same (you) have come down or descended to the world of mortals as the daughter of a king. १५ Having assigned me to you. १६ To the range of sight. १७ Much less do I talk with them (mortals). For this use of किमुत: in the double sense of "how much more or how much less" See Guide to S. C. १८ According to the form of marriage called Gāndharva, in which the only condition necessary is the mutual consent of the bride-groom and the bride. १९ If not, otherwise. २० Together with the family, family and all.

भिधाय गरुडादवतर्यं[1] सव्ये पाणौ कृत्वा तां सभयां सलज्जां वेषमानुं शय्यायामनतिक्रान्तश्च रात्रिशेषं यावद्वात्स्यायनोक्तविधिना निषेव्य[2] प्रत्यूषेलक्षितो[3] जगाम । एवं तां तस्य नित्यं सेवमानस्य कालो याति । अथ कदाचित्कञ्चुकिनस्तस्या अधरोष्ठप्रवालखण्डनं[4] दृष्ट्वा मिथः प्रोचुः । अहो पश्यतास्या राजकन्यायाः पुरुषोपभुक्तायाः[5] इव शरीरावयवाः संभाव्यन्ते । तत्कथमयं सुरक्षितेष्वस्मिन्गृह एवंविधो व्यवहारः । तदाज्ञे[6] निवेदयामः[7] । एवं निश्चित्य सर्वे समेत्य[8] राजानं प्रोचुः । देव वयं न विद्मः परं सुरक्षितेपि कन्यान्तःपुरे कश्चित्प्रविशति तदेवः प्रमाणमिति । तच्छ्रुत्वा राजातीव व्याकुलितचित्तो[9] देवीं रहःस्थां[10] प्रोवाच । देवि ज्ञायतां किमेते कञ्चुकिनो वदन्ति । तस्य[11] कृतान्तः कुपितो येनैतदेवं क्रियते । देव्यपि तदाकर्ण्य व्याकुलीभूता सत्वरं गत्वा तां खण्डितार्धरां[12] नखविकर्तितशरीरावयवामपश्यत । आह च । आः[13] पापे कुलकलङ्किनि किमेवं शीलखण्डनं[14] कृतम । कोयं कृतान्तावलोकित-

---

१ Having taken hold of her with the right hand. २ During the remaining portion of the night. ३ Understand here तां as the object of निषेव्य having enjoyed. ४ Some time passed while he was thus enjoying her. ५ Then once on a time. ६ Having seen a sign of biting on her coral-like lower-lip अधरोष्ठ एव प्रवालः. क. ७ The limbs of the body of the princess appear as if she were being enjoyed by a man. ८ Affair. ९ So let us inform the king of this निवेदय governs the dative of the person to whom some thing is told. The present indicative is often used for the Imperative mood. So निवेदयाव = निवेदयाम. १० Having come together. ११ Greatly distressed at heart. १२ When she was in private. १३ The god of death is angry with him, by whom this is done, that is, he who has spoiled the virginity of the princess deserves no less a punishment than death. १४ Whose lower-lip was bitten. १५ Whose limbs were scratched with nails, नखैर्विकर्तिताः शरीरावयवाः यस्या ताम्. क. १६ आः an interjection implying anger or displeasure. १७ Oh sinful one. १८ A disgrace to, or stain on, the family. १९ The destruction of virtue. २० Looked at, or marked as a victim by death.

स्वत्सकाशमभ्येति[1] तत्कथयतीवंगतेपि[2] सत्यम् । तच्छ्रुत्वा सापि व्रपाधोमुखी[3] सकलं विष्णुरूपकैलिकवृत्तान्तं निवेदयामास । सापि तच्छ्रुत्वा प्रहसितवदना[4] पुलकाङ्कितसर्वाङ्गी[5] सत्वरं गत्वा राजानमूचे । देव दिष्ट्यां वर्धसे । नित्यमेव निशीथे भगवान्नारायणः कन्यकापार्श्वमभ्येति[6] । तेन गान्धर्वविवाहेन सा विवाहिता[7] । तदद्य त्वया मया च रात्रौ वातायनगताभ्यां[8] निशीथे द्रष्टव्यो यतो न स मानुषैः सहालापं करोति । तच्छ्रुत्वा हर्षितस्य राजस्तद्दिनं वर्षशतप्रायमिव[9] कथंचिज्जगाम । ततस्तु रात्रौ निभृतो[10] भूत्वा राज्ञीसहितो राजा वातायनस्थो[11] गगनामर्कदृष्टिर्यावन्निषीदति[12] तावद्गरुडारूढं तं शङ्खचक्रगदापद्महस्तं[13] यथोक्तचिह्नाङ्कितं[14] व्योम्नोवतरन्तमपश्यत् । ततः सुधापूरपरिप्लावितमिवात्मानं मन्यमानस्तामुवाच । प्रिये नास्त्यन्यो धन्यतरो मत्तश्चश्च यत्प्रतिनारायणो[15] भजते । तत्सिद्धाः सर्वस्माकं मनोरथाः । अधुना जामातृप्रभावेण सर्वा वसुमती[16] वशे[17] भविष्यति । एवं निश्चित्य सर्वैः सीमाधिपैः[18] सह मर्यादाव्यतिक्रम[19]-

---

१ Though such is the state of things; when your crime is so evident. २ Who had hung down her head through shame. अधः मुखं यस्याः सा. ब. ३ The account of the weaver disguised as Vishnu. ४ With a smiling countenance. ५ Whose whole body was covered with horripilation. पुलकैः अंकितं सर्वं अंगं यस्याः सा. ब. ६ You are happy; this expression is equal to the English: I congratulate you (on &c.). ७ पार्श्वमभ्येति = पार्श्वमेति comes near. ८ विवाहिता = व्यूढा. ९ Seated in the window. १० As if equal in length to a hundred years, that is, very long. ११ With great difficulty, any how. १२ Being concealed, that is, concealing himself. १३ Standing at the window. वातायने तिष्ठतीति. १४ With the eyes directed towards the sky. १५ Having in his hands शंख &c. १६ Furnished with the signs mentioned before. १७ From the sky. १८ As if deluged with the flood of nectar. १९ More blessed. २० Since Narayana enjoys our offspring. २१ The earth. २२ Will come in my power. २३ Border-kings. २४ The encroachment on the boundaries.

मकरोत् । ते च ते मर्यादाव्यतिक्रमेण वर्तमानमालोक्य सर्वे समेत्य तेन सह विग्रहं[3] चक्रुः । अत्रान्तरे स राजा देवीमुखेन[4] तां दुहितरमुवाच । पुत्रि त्वयि दुहितरि स्थितायां किमेवं[5] युज्यते यत्सर्वे पार्थिवा मया सह विग्रहं कुर्वन्ति । तत्संबोध्योध्य भर्तां त्वया यथा स मम शत्रून्व्यापादयति । अथ तया स कौलिको रात्रौ सविनयमभिहितः । भगवन् त्वयि जामातरि स्थिते मम तातो यच्छत्रुभिः परिभूयते तन्न युक्तम । तत्त्वमादं[6] रूत्वा सर्वान्मिलान्व्यापादय । कौलिक आह । सुभगे कियन्मात्रास्ते[7] तव पितुः शत्रवः । तद्विश्वस्ता भव क्षणेनापि सुदर्शनचक्रेण सर्वान्मिलशः[8] खण्डयिष्यामि । अथ गच्छताकालेन समस्तदेशः शत्रुभिर्व्याप्तः[9] । अस्य केवलं स राजा प्राकारशेषः[10] कृतः । तथापि वासुदेवरूपधरं[11] कौलिकमजानन्राजा नित्यमेव विशेषतः कर्पूरागरुकस्तूरिकादिपरिमलविशेषान्नानाप्रकारवेषभक्ष्यपेयांश्च प्रेषयेद्दुहितुमुखेन[12] तमूचे । भगवन्प्रभातं[13] नृनं स्थानभङ्गो भविष्यति यतो यवसेन्धनक्षयैः संजातस्तथा सर्वोपि जनः

---

१ Living २ Having joined together ३ Declared war with him. ४ Through the mouth of, through the Queen. ५ You being our daughter. ६ What, is it proper that &c. ७ You should request your husband so that &c. ८ Is despised, defeated. ९ How great a measure, of what account, are they? किय-मात्रा = किय-ता मात्रा येषां ते. ब. १० With the discs called सुदर्शन. ११ Shall cut them to pieces as small as (तिल) se-ame, that is, shall cut them into small pieces. १२ Occupied १३ The king had only the fortress out of the kingdom left to him अस्य राज्ञः देशस्य. प्राकारशेषः = प्राकार एव शेषः यस्य. ब. १४ Not knowing that it was the कौलिक who appeared in the disguise of Vasudeva. १५ Fragrant things such as comphor, aloe, musk and others. कर्पूरागरुकस्तूरिका आदयः येषां तान् (परिमल विशेषान्) ब. १६ Consisting also of various sorts of garments, eatables and drinkables. This is also ब. and an adjective of कर्पूरा...विशेषान्. नाना प्रकाराणि वेषभक्ष्याणि पेयानि च येषु तान्. १७ प्रेषयत् (Sending) having for its object कर्पूरा.. विशेषान्; and विशेषतः especially, as special gifts on the present occasion. १८ Indeed or certainly in the morning. १९ We shall lose our place (fortress). २० The supply of fodder and fuel is over or has fallen short.

प्रहारैर्जर्जीरतदेहः संक्षीणो योद्धुमक्षमः प्रचुरैर्मृतश्च । तदेवं ज्ञात्वात्रैव काले यदुचितं भवति तद्विधेयमिति । तच्छ्रुत्वा कौलिकोप्यचिन्तय-त्तस्थानभङ्गे जाते ममानया सह वियोगो भविष्यति तस्मादरुहमा-रुह्य सायुधमात्मानमाकाशे दर्शयामि । कदाचिन्मां वासुदेवं मन्य-मानास्ते माशङ्का राज्ञो योद्धृभिर्हन्यन्ते । उक्तं च ।

[1]निर्विषेणापि सर्पेण कर्तव्या महती फणा ।
विषं भवतु मा भूद्वा फटाटोपो भयंकरः ॥ २०४ ॥

अथवा मम स्थानार्थे [2]उद्यतस्य मृत्युर्भवति तथापि सुन्दरतरं[3]मम । उक्तं च ।

[4]गवामर्थे ब्राह्मणार्थे स्वाम्यर्थे स्त्रीजनेथवा ।
स्थानार्थे यस्त्यजेत्प्राणांस्तस्य लोकाः सनातनाः ॥ २०५ ॥

एवं निश्चित्य प्रत्यूषे [5]दन्तधावनं विधाय तामूचे । सुभगे समस्तै[6]-शत्रुभिर्हतैरन्नं पानं चास्मादयिष्यामि । किं बहुना । त्वयापि सह

---

१ Exhausted in body by the wounds (received in defending the fort). २ Unable. ३ And many are killed or have fallen. ४ अवकाल = अवसर-काले. ५ Let that which is suitable to the occasion be done. ६ Let me show myself armed in the sky. The present Ind. used for the Imperative. ७ Full of fear (thinking me to be Vasudeva himself). ८ The king's soldiers. ९ Even that snake who has no poison should spread out his hood fully, there may or may not be poison, but the very spreading of the hood is terrible to look at. The verse as seen elsewhere is—निर्विषेणापि कर्तव्या सर्पेण महती फटा । विषं भवतु वा मास्तु फटाटोपो भयंकरः ॥ In the verse in the book the two words फणा and फटा are, therefore, synonymous. १० Ready for or intent on saving the place of the king. ११ अथवा तथापि याहि तथा. If then. १२ More pleasant, much better, (than, of course, the destruction of the enemies by the king's soldiers) १३ The good or happy world is the eternal place of residence of him who will sacrifice his life for the sake of cows, Brâhmans, the master, a woman, and a place of residence. १४ Washing the teeth. १५ When all the enemies are killed. This may be considered as an instance of the Instrumental absolute in Sanskrit, and may be rendered by समस्तेषु शत्रुषु हतेषु.

संगमं त[1] : करिष्यामि । परं वाय्वस्त्रया निजघिता यत्त्वया प्रभाते सर्वसैन्येन सह नगरान्निष्क्रम्य योद्धव्यमहं चाकाशस्थस्त्वन्निस्तेजसः[2] करिष्यामि अथास्त्रेण भवता हन्तव्याः । यदि पुनरहं तान्त्वयमेव मूर्च्छयामि तदापि पापात्मनां वैकुण्ठाया गतिः स्यात् । तस्मात्ते तथा कर्तव्यं यथा पलायन्तो[3] हन्यमानाः स्वर्गं न गच्छन्ति । सापि तदाकर्ण्य पितुः समीपं गत्वा सर्वं वृत्तान्तं न्यवेदयत । राजापि तस्या वाक्यं श्रद्दधानः पत्युषे समुत्थाय सुसंनद्धसैन्यो युद्धार्थं निर्जगाम । कौलिकोऽपि मरणकृतनिश्चयः[4] सर्वायुधसैन्यसमेतो रथमारुह्य युद्धाय प्रस्थितः । अत्रान्तरे भगवता नारायणेनातीतानागतवर्तमानवेदिना स्मृतमात्रो वैनतेयः समीपे विहस्य प्रोक्तः । भो गरुत्मन् जानामि त्वं यन्मम रूपेण कौलिको दारुमयगरुडे समारुह्य राजकन्यां कामयते । सोऽब्रवीत् । देव सर्वं ज्ञायते तच्चेष्टितमेव । तत्किं कुर्मः सांप्रतमेव । श्रीभगवानाह । अद्य कौलिको मरणे कृतनिश्चयो विहितनियमो युद्धार्थं विनिर्गतः । स नूनं प्रधानसैन्यपरिग्रहतो

---

१ Should be told or informed. Pot. Passive P. of वच् २ P. ३ Should fight ४ Remaining in the sky ५ Destitute of energy निर्गतं तेजः यस्मात् स. ब. ६ With ease, easily. ७ Kill or destroy ८ Evil-minded, or wicked. ९ Will go to, or obtain Paradise or the world of Vishnu for being killed while fighting with the enemy. १० They should be so dealt with or treated ११ Being killed while running from the battle-field. पलायन्त पलायमानाः Pre. P. of पलाय् (भ्वा+३) to run — here used in the Para-mahada. १२ With his army well armed or equipped. सह सन्नद्धं सैन्यं यस्य ब. १३ Determined to die in battle. स. त. १४ Bow in hand चापः पाणौ यस्य १५ Moving in the sky. गगणे गतिर्यस्य. ब १६ Knowing the past, the future (अनागत) and the present This is an इयदर्थ Comp. (अतीतं च अनागतं च वर्तमानं च) अतीतानागतवर्तमानानि वेत्ति. १७ Being only remembered, as soon as he was remembered. १८ Arrived. P. P. of आप with सम and प्र १९ His tricks or movements. २० Now, for the present. २१ One who has taken upon himself a vow. विहितं नियमं येन. ब. २२ Being struck with an arrow by a powerful warrior—प्रधान chief, and hence, powerful, brave.

धनमेष्यति । तस्मिन्हते सर्वो जनो नृपं द्वेष्यति यत्पभूतक्षतिर्भविष्यति । तस्मात्त्वं गरुडश्च निपातितः । ततः परं लोक आत्मनः पूजां न करिष्यति । ततस्त्वं द्रुततरं तत्र दारुणं गरुडे संक्रमणं कुरु । अहमपि कौलिकशरीरं आवेशं करिष्यामि येन स शत्रून्व्यापादयति । ततश्च शत्रुवधादावयोर्माहात्म्यवृद्धिः स्यात् । अथ तथेति प्रतिपन्ने श्रीभगवान्नागयणस्तच्छरीरं संक्रमणमकरोत् । ततो भगवन्माहात्म्येन गगणस्थः स कौलिकः शङ्खचक्रगदाचापचिह्नितः क्षणादेव लीलयैव सर्वानपि प्रधानक्षत्रियान्निस्तेजसमश्वकार । ततस्तेन राज्ञा स्वसैन्यपरिवृतेन जिता निहताश्च ते सर्वेपि शत्रवः । जनश्च लोकमध्ये प्रवादो यथानेन विष्णुजामातृप्रभावेण सर्वे शत्रवो निहता इति । कौलिकोपि तान्हतान्दृष्ट्वा प्रमुदितमना गगणादवतीर्णः सभ्यावद्राजामात्यपौरलोकास्ते नगरवास्तव्यं कौलिकं पश्यन्ति ततः पृष्टः किमेतदिति । ततः सोपि मूलादारभ्य सर्वं प्रावृत्तान्तं न्यवेदयत् । ततश्च कौलिकमाहसानुरञ्जितमनसा शत्रुवधदत्ततेजसा राज्ञा सा राजकन्या सकलजनप्रत्यक्षं विवाहविधिना तस्मै समर्पिता देशश्च प्रदत्तः । कौलि-

---

१ Death. २ He being killed, when he is killed. ३ Having come together, conjointly. ४ Make an entrance into, or enter into. ५ Entrance. ६ Our greatness or importance will be heightened. ७ That being agreed to (by Garuda). ८ By the greatness of the god. भगवत्. महात्म्येन. ष. त. ९ In a moment. १० With ease, easily. Cf. सुखेन. ११ All the enemies *without a single exception* (आदि) were defeated and slain. १२ There was a talk among people, it was openly talked. १३ By the power of his son-in-law, Vishnu. विष्णुरेव जामाता. क. १४ Delighted at heart. १५ Descended. Here the sentence ought to end. १६ When the king, the ministers and citizens saw that he was a weaver living in the town. नगरवास्तव्यं=नगरे वास्तव्यं यस्य तम्. ब. १७ From the beginning. १८ Previous account. १९ The king whose mind was diverted by the adventurous disposition of the weaver, and who had obtained new vigour by the destruction of the enemies. २० In the presence of all people. २१ And a country was assigned to him for his sustenance.

कोपि तया सार्धं पञ्चप्रकारं जीवलोकमात्रं विषयसुखमनुभवन्कालं निनाय ॥

अतस्तूच्यते सुप्रयुक्तस्य कर्मण्यपि ।

करटक आह। अथैवंविधे व्यतिकरे किं कार्यमावाभ्याम्। दमनक आह। एवंविधेपि समये मम बुद्धिस्फुरणं भविष्यति येन प्रभोः संजीवकं विश्लेषयिष्यामि। उक्तं च।

[1]एकं हन्यान्न वा हन्यादिषुर्मुक्तो धनुष्मता ।
बुद्धिर्बुद्धिमतोत्सृष्टा हन्याद्राष्ट्रं सराजकम् ॥ २०६ ॥

करटक आह। यद्यपि ते बुद्धिप्रागल्भ्यं तथापि त्वं पिङ्गलकात्तं वियोजयितुमसमर्थ एव। दमनक आह। भ्रातः असमर्थोपि समर्थ एव। उक्तं च।

[10]उपायेन हि यत्कुर्यान्न शक्यं पराक्रमैः ।
काक्या कनकसूत्रेण कृष्णसर्पो निपातितः ॥ २०७ ॥

करटक आह। कथमेतत्। सोब्रवीत्।

॥ कथा ६ ॥

कस्मिंश्चित्प्रदेशे महातरौ वायसदंपती प्रतिवसतः स्म। अथ तयोः

---

१ The essence of this worldly existence. २ The happiness derived from sensual enjoyments. ३ Therefore, it is said &c. ४ Such being the state of things. ५ The flashing forth of the intellect. ६ Separate, alienate. 2nd Fut. of caus. of विश्लिष् 4 P. with वि. ७ The arrow discharged by an archer may or may not hit a man, but the talent used (lit. hit. forth) by a talented man will hit even a kingdom together with the king. ८ The skill or proficiency of talent. ९ The same as विश्लेषयिष्यामि 6 above. १० That which one can accomplish by remedies, is not possible to do (कर्तुम्) by valour; a female crow destroyed a black-serpent by means of a gold cord or string (used as an ornament). Another reading for उपायेन हि यत्कुर्यात् is उपायेन हि यच्छक्यम्. ११ A crow.

प्रसवकाले वृक्षविवरगोचरिकम्य कृष्णसर्पः सदैव तदपत्यानि भक्षयति । ततस्तौ निर्वेदादन्यवृक्षमूलनिवासिनं प्रियसुहृदं शृगालं गत्वोचतुः । भद्र किमेवंविधे संजाते तावयोः कर्तव्यं भवति । एष तावदुष्टात्मा कृष्णसर्पो विवरगोचरिगत्यावयोर्बालकान्भक्षयत्येव । तत्कथ्यतां तद्रक्षार्थं कश्चिदुपायः ।

[1]यस्य क्षेत्रं नदीतीरे भार्या च परसंगता ।
समर्पे च गृहे वासः कथं स्यात्तस्य निर्वृतिः ॥ २०८ ॥

अन्यच्चास्माकमपि तत्रस्थानां प्रतिदिनं प्राणसंशयः । स आह । नात्र विषये विषादः कार्यः । नूनं स लुब्धो नोपायमन्तरेण वध्यः स्यात् ।

[12]उपायेन जयो यादृग्रिपोस्तावन्न हेतिभिः ।
उपायज्ञोऽल्पकायोपि न शूरैः परिभूयते ॥ २०९ ॥

---

१ At the time of delivery or bringing forth young ones. २ A hollow. ३ Their young ones. तयोरपत्यानि. Here तयो stands for the masculine and feminine. It is an एकशेषद्वंद्व. ४ Through sorrow or dejection of spirits. ५ Residing at the root of another tree. ६ Dear friend. ७ Such being the case; when we are thus circumstanced. ८ For their protection, for saving them. तेषां रक्षार्थम्. ष. त. ९ How can he, whose abode is situated on the banks of a river, whose wife is attached to another (paramour), and who lives in a house inhabited by snakes, have happiness or ease? परसंगता. त. त. १० While living there. ११ Danger to life. संशय meaning doubt, fear &c. is of frequent occurrence in Sanskrit. १२ Sorrow, [illegible] १३ In this case. अत्र = अस्मिन्. Without a remedy. अन्तरेण and अन्तरा govern the accusative. See Guide. १४ That much victory, which is obtained against an enemy by making use of a remedy is not obtained by means of swords (हेतिभिः); one who knows a remedy is not defeated by brave persons though he be small in body or bulk. Here यादृक् ought to have been followed by its usual correlative तादृक्, or in place of यादृक् one would expect यावान् to correspond with तावान्. उपायं जानातीति उपायज्ञः. उप.; अल्पकायः ब.

तथा च । भक्षयित्वा बहून्मत्स्यान्कृतमाधममध्यमान् ।
अतिलौल्यात्तृकः कश्चिन्मृतः कर्कटकग्रहात् ॥ २१० ॥
तावूचतुः । कथमेतत् । सोऽब्रवीत् ।

॥ कथा ७ ॥

अस्ति कस्मिंश्चित्प्रदेशे नानाजलचरसनाथं सरः । तत्र च कृताश्रयो बकः एकः वृद्धभावैमपागतो मत्स्यान्यापादयितुममर्थः । ततश्च क्षुत्क्षामकण्ठः सरस्तीरे उपविष्टो मुक्ताफलसदृशैरश्रुपवाहैर्धरातलमभिषिञ्चन्रुरोद । एकः कुलीरकः नानाजलचरसमेतः समेत्य तस्य दुःखेन दुःखितः सादरमिदमुवाच । मामे किमद्य त्वयाहारवैचित्र्यानुष्ठीयते । केवलमश्रुपूर्णनेत्राभ्यां मुखेनैवमेव स्थीयते । स आह । वत्स सत्यमुपलक्षितं भवता । मया हि मत्स्यादनं प्रति परमवैराग्यतया सांप्रतं प्रायोपवेशनं कृतं तेनेहं समीपगतानपि मत्स्यान्न भक्षयामि । कुलीरकस्तच्छ्रुत्वा प्राह । किं तद्वैराग्यकारणम् । स प्राह । वत्स अहमस्मिन्सरसि जातो वृद्धिं गतश्च । तत्रमयैतच्छ्रुतं यद्दादशवार्षि-

---

१ Having devoured various sorts of fishes, viz., the best, the lowest and the middling, a crane perished through excess of greed, being seized by a crab or by reason of the seizure (यह) by a crab. २ Full of various water animals. नानाजलचरैः सनाथं स. त. ३ Residing, dwelling. कृतः आश्रयः येन. ब. ४ Reduced to the state of old age, become old. ५ Wetting the ground with tears falling down in drops resembling pearls. ६ A crab. ७ Accompanied with various acquatic animals. ८ Having come together. Here सम seems to have no propriety of meaning as समेत्य expresses the sense of it. ९ Grieved at his grief, sympathizing with him in his grief. १० A term of address meaning uncle. ११ The action of taking food, eating &c. १२ Remain sighing. नि श्वासेन सहितेन. ब. १३ Marked; observed. १४ Great absence of desire as regards the devouring of fish. परमवैराग्यता abstract noun from परमविरागः परमः विरागः यस्य. ब. १५ Abstaining from food and awaiting the approach of death. १६ For that reason. १७ Born and brought up. १८ Lasting for a period of 12 years; an adjective from द्वादशवर्ष by the taddhita affix इक.

क्यनावृष्टिः संपद्यते[1] । मा । कुलीनक आह[2] । तस्मात्तच्छ्रुतम् । धक आह[3] । दैवज्ञमुखात् । यतः शनैश्चरो रोहिणीशकटं भित्त्वा भौमश्च शुक्रश्च प्रयास्यति । उक्तं च वराहमिहिरेण[4] ।

यदि रोहिण्याः शकटं भिनत्ति रविनन्दनो गगणवीथ्याम्[5] ।
द्वादश वर्षाणि तदा न हि वर्षति वासवो भूमौ[6] ॥ २११ ॥

तथा च । प्राजापत्ये शकटे भिन्ने[7] रूक्षेव पातकं वसुधा[8] ।
भस्मास्थिशकलकीर्णा कापालमिव व्रतं धत्ते[9] ॥ २१२ ॥

तथा च । रोहिणीशकटमर्कनन्दनश्चेद्भिनत्ति रुधिरोथवा शशी[10] ।
किं वदामि तदनिष्टसागरे संक्षयं जगदशेषमुपैति[11] ॥२१३॥

तदेतन्मरः[12] स्वल्पतोयं वर्तते । शीघ्रं शोषं यास्यति[13] । अस्मिंश्च[14] शुष्के

---

१ Absence of rain ; drought. २ Is close (लगना) at hand, is closely impending. ३ From an astrologer or fortune-teller. ४ The planet शनि, Saturn. ५ The constellation Rohini in the form of a cart. ६ The planets Mars (मंगल) and Venus. ७ A very famous Indian astronomer, who flourished in the 6th century A. D. ८ If the *son of Ravi* (Saturn) crosses the cart of Rohini in his passage through the sky, Indra does not send down rain on the earth for twelve years. (भिनत्ति lit. breaks through.) ९ When the cart of Prajâpati (the cart of Rohini, of which Prajâpati is the deity) is passed through (भिन्ने), the Earth being covered with ashes and pieces of bones, as if it has committed some sin, assumes the vow of a skull-bearer (a devotee of Śiva). The earth is here compared to a कापालिक by reason of its being strewed with the ashes and bones of the persons who have died in consequence of the drought. A कापालिक is one who covers his body with ashes and carries in his hand a human skull to carry alms in as an atonement for his sin. १० If either the son of the sun (अर्क) that is, Saturn, Mars or the Moon passes through the cart of Rohini, what should I say with respect to the evils that arise therefrom ? The whole earth goes to destruction or is destroyed. तदनिष्टसागरे = तस्यानिष्टस्य सागरे. with regard to the numberless evils that arise. Here तत् refers to the fact of the Saturn passing through &c. अशेषं = नास्ति शेषं यस्य. ह. Entire, whole. ११ Is a, Bah. Comp. १२ Will be dried up. १३ When it is dried up.

A

POPULAR EDITION

OF THE

FIRST TANTRA

OF

VISHNUSARMAN.

(Containing a full Glossary and a literal translation of the verses occurring in the Text.)

BY

MAHADEVA SHIVARÁMA ÁPTE, B.A.,

1st Assistant Master, High School, Satara.

PUBLISHED BY HARI NARAYAN GOKHALE,

Manager Arya-Bhushana Press,

Poona.

All rights reserved by the publisher.

1894.

PRINTED AT THE *Arya-Bhúshana* PRESS, POONA.

यैः महाहं वृद्धिं गतः सदैव क्रीडितश्चैते सर्वे तोयोभावाभावा[1] यास्यन्ति । तेषां वियोगं द्रष्टुमहममर्थः । तेनैतत्प्रायोपवेशनं कृतम् । मांप्रति सर्वथा स्वल्पजलाशयानां जलचरा गुरुजलाशयेषु स्वस्वैजनैर्नीयन्ते केचिच्च मकरगोधाशिशुमारजलहस्तिप्रभृतयः स्वयमेव गच्छन्ति । अत्र पुनः सरसि ये जलचरास्ते निश्चिन्ताः सन्ति तेनाहं विशेषाद्वार्हिमि यद्वीजशेषमात्रमप्यत्र नोद्गरिष्यति । ततः स तदाकर्ण्यान्येषामपि जलचराणां तनय्य वचनं निवेदयामास । अथ ते सर्वे भयत्रस्तमनसो मत्स्यकच्छपप्रभृतयस्तमभ्युपेत्य पप्रच्छुः । माम अस्मि कश्चिदुपायो येनास्माकं रक्षा भवति । बक आह । अस्यस्य जलाशयस्य नातिदूरे प्रभूतजलमनाथं सरः पद्मिनीखण्डैमण्डितं यच्चतुर्विंशत्यापि वर्षाणामवृष्ट्या न शोषमेति । तयाहं मम पृष्ठं कश्चिदारोहति तदहं तं तत्र नयामि । अथ ते तत्र[12] विश्वाममापन्नास्तात मातुल भ्रातरिति ब्रुवाणा अहं पूर्वमहं पूर्वमिति ममन्तान्परितस्थुः । सोपि दुष्टाशयः क्रमेण तान्प्रभूतमांसान्य जलाशयस्य नातिदूरे शिलां[14] मेमांसाय तस्यामाक्षिप्यं[15] स्वेच्छया भक्षयित्वा भूयोपि

---

१ Played, sported. P. P. of क्रीड् used actively. २ Through the absence or want of water. ३ The water-animals living in small ponds or reservoirs of water. स्वल्पजलाशयाश्च. क. ४ By their respective relatives. ५ A large water-lizard. ६ The Gangetic porpoise. ७ Water-elephant. ८ अत्र सरसि = In this lake. ९ Free from anxiety or care. १० For that reason, *viz.*, that expressed by यत् following. ११ For not even a seed of them will remain here or will be left here. उद्गरिष्यति should be taken in the passive sense = उद्गरिष्यते. वीजशेष-वीजमेव शेषः. क. १२ The fish, tortoise and others. मत्स्यकच्छपी प्रभृतौ येषां ते. ब. १३ Not far from this lake. १४ Adorned with a multitude of lotus-plants. १५ Absence of rain, drought. १६ तत्र = तस्मिन् &c. Those who put confidence in him; in whom was engendered confidence about him. १७ Stood around him saying I first, I first, that is, take me first, take me first. १८ Of evil or wicked intention. दुष्ट आशयः यस्य. १९ Having reached. २० Having dashed.

जलाशयं समासाद्य जलचरगणं मिथ्यावर्णनादेशकैर्मनसि रञ्जयन्नित्यामिवाहारवृत्तिमकरोत् । अन्यस्मिन्दिने स्थ कुलीरकेणोक्तः । माम मया सह ते प्रथमः स्नेहसंभाषः संजातः । तत्किं मां परित्यज्यान्यान्नयसि । तस्मादद्य मे प्राणत्राणं कुरु । तदाकर्ण्य सोपि दुष्टाशयश्चिन्तितवान् । निर्विण्णोहं मन्त्यमांसादनेन । तदद्यैतं कुलीरकं व्यञ्जनस्थाने करोमि । इति विचिन्त्य तं पृष्ठे समारोप्य तां वध्यशिलामुद्दिश्य प्रस्थितः । कुलीरकोपि दूरादेवास्थिपर्वतं शिलाश्चयमवलोक्य मन्त्यास्थानि परिज्ञाय तमपृच्छत । माम किमेतन्न जलाशयः । मदीयभाग्यातिशयान्नन्दं तत्कथयं । सोपि मन्दधीर्जलचरोयमिति मत्वा स्थले न प्रभवतीति सस्मितमिदमाह । कुलीरक कुतोन्यो जलाशयः । मम प्राणयात्रेयम् । तस्मात्समर्पयात्मानमो भीष्टदेवता । त्वामप्यस्यां शिलायां निक्षिप्य भक्षयिष्यामि । इत्युक्तवति तस्मिन्सध्वदर्नदंशाद्वयेन मृणालेनालम्बलायां मृदुग्रीवायां गृहीतो मृतश्च । अथ स तं बकपतिं समादाय शनैः शनैस्तज्जला-

---

१ By giving them (जलचर) false account of things. २ Like the usual one. ३ One day (it does not mean exactly the next day). ४ Friendly discourse ५ The saving of life. आत्मपाल ६ Save my life. ७ I am disgusted with eating the flesh of fishes. ८ Use (him) as condiment or sauce ९ The stone of execution, that is, the stone on which he dashed his prey before eating it. तत्र has no force of the passive here. १० Towards. ११ A heap of bones. ११ Lying on the stone. शिला आसन्न यस्य स (शिलापर्वतं) ब. १२ How far, how remote. १३ Greatly fatigued. १४ Dull-headed, of dull intellect. मन्दधीर्यस्य. ब. १५ Has no power on land; is powerless on land. Here understand मन्या after मन्यवतीति. १६ Subsistence, maintenance. १७ Let your desired or tutelary deity be remembered; make yourself ready for death by offering your last prayers to your deity. १८ With two teeth of his mouth. स्व here refers to the कुलीरक. १९ As white as the stalk of a lotus. मृणालनाल इव धवला. क. २० Was seized and perished. Here there is a violation of the rule of Syntax, viz., the subject of the Loc. absolute (construction) cannot be the subject of the principal sentence.

शयम्[1]समाद् । ततः सर्वैरेव जलचरैः[2] पृष्टः । भोः कुलाग्रक किंनिमित्तम्[3]स्वं पश्चादायातः । कश्चित्कारणं तिष्ठति[4] । न मातुलोपि नायातः । तत्किं चिरयसि[5] । वयं सर्वे सोत्सुकाः[6] कृतक्षणास्तिष्ठामः[7] । एवं तैरभिहितं कुलाग्रकोपि विहस्यावाच । मृर्खाः सर्वे जलचरास्तेन मिथ्यावादिना वञ्चयित्वा नातिदूरं शिलातले प्रक्षिप्य भक्षिताः । तन्मयायुःशेषतया तस्य विश्वासघातकस्याभिप्रायं ज्ञात्वा प्रीत्या यमानीता[8] । तदलं संभ्रमेण । अधुना सर्वजलचराणां क्षेमं[9] भविष्यति॥

अतोहं ब्रवीमि भक्षयित्वा बहून्मत्स्यानिति ।

वायस आह । भद्र तत्कथय कथं स दुष्टमर्पो वधमुपैष्यति[10] । शृगाल आह । गच्छतु भवान्किंचिन्नगरं राजोधिष्ठानम[11] । तत्र कस्यापि धनिनो राजामात्यादेः[12] प्रमादिनः कनकसूत्रं[13] हारं[14] वा गृहीत्वा तत्कोटरे[15] प्रक्षिप येन सर्पस्तद्ग्रहणेन वध्यते[16] । अथ तत्क्षणात्काकः काकी च तदाकर्ण्यात्मिच्छयोत्पतितौ[17] । ततश्च काकी किंचिन्मरः

---

१ Reached, approached that pond. Here तज्जलाशय cannot be a Genitive Tatpurusha, but it is कमेधाय तज्जलाशयम् २ With what object in view, for what purpose? किंनिमित्त यस्य ३–किंनिमित्तः. ३ Come back, returned. ४ Is there any cause in your return that concerns our welfare? Here कश्चित् is to be understood after तिष्ठति. ५ Why do you then delay telling us what motive has induced you to come back. ६ We are all very anxious and waiting impatiently for the right moment. सोत्सुका and कृतक्षणाः व. ७ Liar. ८ As I am yet destined to live by reason of the remainder of my life. ९ Then enough of haste or rashness अल (enough) governs generally the Instrumental and sometimes the absolutive or Infinitive of purpose, *e. g.* अलमन्यथा गृहीत्वा &c. १० Safety, welfare ११ Go to or near: meet with. १२ The place of residence of a sovereign or his capital. १३ Of a king. minister &c. who may be careless. राजामात्यादेः राजामात्यो आदौयस्य. व. १४ A string or garland of gold. १५ Wreath, garland. १६ तस्य कोटरे in his hole. १७ For having taken it away. १८ Of their own will, of their own accord. १९ Flew up.

प्राप्य यावत्पश्यति तावत्तन्मध्ये कस्यचिद्राज्ञोन्तःपुरं जलाशयं न्यस्त-कनकसूत्रं मुक्तमुक्ताहारवस्त्राभरणं जलक्रीडां कुरुते । अथ सा वायसी कनकसूत्रमेकमादाय स्वैगृहाभिमुखं ततस्थे । तैतश्च कंचुकिनो वैयग्घराश्च तत्रीयमानमुपलक्ष्य गृहीतलगुडाः सत्वरमनुययुः । काकयपि सर्पकोटरं तत्कनकसूत्रं प्रक्षिप्य सुदूरमवस्थिता । अथ यावद्राजपुरुषास्तं वृक्षमारुह्य तैत्कोटरमवलोकयन्ति तावत्क्रुण्णसर्पः प्रसारितभोगैस्तिष्ठति । ततस्ते लगुडप्रहारेण हत्वा कनकसूत्रमादाय यैथाभिलषितं स्थानं गताः । वायसदंपती अपि ततः परं सुखेन रमतः॥ अतोहं ब्रवीम्युपायेन हि यत्कुर्यादिति ।

तत्र किंचिदिह बुद्धिमतामसाध्यमस्ति । उक्तं च ।

[13]यस्य बुद्धिर्बलं तस्य निर्बुद्धेस्तु कुतो बलम् ।
वने सिंहो मदोन्मत्तः शशकेन निपातितः ॥ २१४ ॥

करटक आह । कथमेतत । स आह ।

॥ कथा ८ ॥

कस्मिंश्चिद्वने भासुरको नाम सिंहः प्रतिवसति स्म । अथासौ

---

१ As soon as; no sooner than. २ The ladies of the female apartments collectively. ३ Near the water. जलस्य आसन्नम्. ष. त. ४ Who had put off or laid aside their gold strings &c. Who had taken off their persons, their pearl-necklaces, clothing and decorations. This and the preceding are both Bah compounds. ५ Towards her own residence स्वगृहस्याभिमुखे यथा स्यात्. अव्ययी. ६ The eunuch attendants on the harem. ७ Who had taken cudgels in their hands. गृहीता लगुडा यैस्ते ब. ९ It may either mean, तस्य कोटरे = सर्पस्य कोटरे or तत् कोटर may mean-that hollow, तत् being a demonstrative pronoun. १० Who had spread out his hood. प्रसारितः भोगः यैस्ते. ब. ११ To the place desired (by them). १२ He who has talent, has power; whence can one, void of talent, have power? A lion intoxicated with pride in a forest was destroyed by a hare. यस्य बुद्धिर्बलं तस्य > Cf. the English " *knowledge is power.*"

वीर्यातिरेकात्[1] नित्यमेवानेकान्मृगशशकादीन्यान्[2] पापान्[3] परान्[4] । अथान्ययुस्तेन[5] जाः सर्वे मार्गवराहमहिषशशकाद्याः मिलित्वा तमभ्युपेत्य प्रोचुः । स्वामिन् किमनेन सकलमृगवधेन नित्यमेव यतस्तवैकेनापि मृगेण तृप्तिर्भवति । तत्किंयतामस्माभिः सह समयधर्मः । अद्यप्रभृति तवाहारार्थमस्माकं[6] प्रतिदिनमेको मृगो भक्षार्थं समेष्यति । एवं[7] कृते तव[8] तावत्प्राणयात्रा कृत्स्ना[9] विनापि भविष्यत्यस्माकं च पुनः सर्वोच्छेदनं[10] न स्यात् । तदत्र राजधर्मोनुष्ठीयताम् । उक्तं च ।

[11]शनैः शनैश्च भोक्तव्यमुपभुक्तं यथाबलम् ।
समायनमिवाप्नोति पुष्टिं परमां व्रजेत् ॥ २१५ ॥

[12]विधिना मन्त्रयुक्तेन रूक्षापि मथितापि च ।
प्रयच्छति फलं भूमिररणीव हुताशनम् ॥ २१६ ॥

---

१ Through the excess of trength २ Deer, hare and others. मृगशशकादीन् आदौ यथा तान् (प्राणिनः) च ३ Did not cease killing, *i. e.*, went on killing, continuously killed. ४ Born *in his* (lion's) *forest* or *in that forest*. In the first case तत्र is a प. त., while in the other it is a क. ५ Deer, boar, buffalo, hare and others सङ्घशशवराहमहिषशशकाः आदयः यथा त. ब. ६ What is the good of this destruction of all beasts. ७ A contract, a bargain, a treaty. ८ While you are sitting here, that is, without your moving from your place. ९ In the order of our kinds. १० Every day. दिने दिने = प्रतिदिनम्. अव्य. ११ First, as regards yourself. १२ Without any trouble at all. १३ But further, as regards ourselves. १४ The total destruction or extirpation of all. सर्वेषामुच्छेदनम्. १५ That wise man, who gradually enjoys his kingdom according to his strength will attain to great prosperity, as a person attains nourishment of the body by taking *a medicine that prolongs life* (रसायन = रस and अयन). १६ A piece of land though sterile, yields fruit when it is cultivated according to the proper mode (मंत्रयुक्तेन विधिना), as the *Arani* (two pieces of wood used in kindling the sacred fire), though rough, gives fire (हुताशनं) when it is handled or churned according to the rite accompanied with the Vedic hymn.

[1]प्रजानां पालनं शस्यं स्वर्गकोशस्य वर्धनम् ।
पीडनं धर्मनाशाय पापायायशसे स्थितम् ॥ २१७ ॥
[2]गोपालेन प्रजाधेनोर्वित्तदुग्धं शनैः शनैः ।
पालनात्पोषणाद्ग्राह्यं न्याय्यां वृत्तिं समाचरेत् ॥ २१८ ॥
[3]अजामिव प्रजां मोहाद्यो हन्यात्पृथिवीपतिः ।
तस्यैका जायते तृप्तिर्न द्वितीया कथंचन ॥ २१९ ॥
[4]फलार्थी नृपतिर्लोकान्पालयेद्यत्नमास्थितः ।
दानमानादितोयेन मालाकार इवद्रुमान् ॥ २२० ॥
[5]नृपदर्पो धनस्नेहं प्रजाभ्यः सहरन्नपि ।
अन्तरम्यैर्गुणैः शुभ्रैर्लक्ष्यते नैव केनचित् ॥ २२१ ॥

१ The protection of the subjects is praiseworthy and increases *the chances of obtaining heaven* (स्वर्ग) and also the treasure; while their oppression tends to the destruction of religion, and to sin and infamy (यशसे may be taken as a कर्मधारय as यशसे एव कोशः which means treasure in the form of heavenly bliss स्थितम with the dative meaning leads to, results in; Cf. तं स्वराद्याय in verse 2. २ A cowherd (गोपाल a king) in the shape of a king should take the milk (wealth) from the cows (of subjects) gradually by protecting and nourishing them (cows, subjects) and thus he should have recourse to a just or righteous path. प्रजाधेन and धनदुग्ध are रू, a king being compared to a cowherd. ३ That king who through folly kills his subjects like a sheep, has satisfaction only once and never for a second time. हन्यात् oppress to death, kill. एकतृप्तिः one gratification, *viz*, when killed. ४ A king wishing to get fruit (revenue) from the subjects, should protect them with great efforts by giving them gifts and honor, as a gardener who wishes to get fruit from the shoots of trees should tend them by giving them manure, water and pruning them with great exertions. Here a king is compared to a gardener. यत्नमास्थितः standing on efforts, making efforts. ५ A king, like a lamp, though he takes revenue from the subjects as the lamp does oil, is never observed to do so by reason of his bright intrinsic merits, as the lamp attracting oil by the wicks (गुणैः) is not seen to do so as it does imperceptibly. शुभ्र white, unsullied.

[1]यथा गौर्दुह्यते काले पाल्यते च तथा प्रजाः।
सिच्यते चीयते चैव लता पुष्पफलप्रदा ॥ २२२ ॥
[2]यथा बीजाङ्कुरः सूक्ष्मः प्रयत्नेनाभिरक्षितः।
फलप्रदो भवेत्काले तद्वल्लोकः सुरक्षितः ॥ २२३ ॥
[3]हिरण्यधान्यरत्नानि यानानि विविधानि च।
तथान्यदपि यत्किंचित्प्रजाभ्यः स्यान्महीपतेः ॥ २२४ ॥
[4]लोकानुग्रहकर्तारः[5]प्रवर्धन्ते नरेश्वराः।
लोकानां संक्षयाच्चैव क्षयं यान्ति न संशयः ॥ २२५ ॥

अथ तेषां तदाकर्ण्य भासुरक आह। अहो सत्यमभिहितं भवद्भिः परं यदि ममाप्युपविष्टस्यात्र नित्यमेव नैकः श्वापदः समागमिष्यति तन्नूनं सर्वानपि भक्षयिष्यामि। अथ ते तथैव प्रतिज्ञाय निर्वृतिभोजस्तत्रैव वने निर्भयाः[7] पर्यटन्ति। एकश्च प्रतिदिनं क्रमेण याति। वृद्धो वा वैराग्ययुक्तो वा शोकग्रस्तो वा पुत्रकलत्रनाशभीतो

---

१ As a cow is milked and fed at the proper time, so are the subjects; a creeper which yields flowers and fruits is watered and gathered (fruits are gathered from it). The meaning is, that if the king wishes to derive revenue from the subjects, he must protect them, as a cow is fed and a creeper is watered. पुष्पं च फलं च पुष्पफले ते ददातीति. उप. २ As a seed-germ though small, when protected with efforts, yields fruit in time, so do subjects (give fruit in the shape of tribute) when well protected. तद्वल्लोकः supply after it फलप्रदः भवेत्. ३ Gold, corn and jewels and various kinds of vehicles and so also everything else, is obtained by the king from the subjects. Supply स्यात् or भवेत् after यत्किंचित्. ४ *The Lords of men* (kings) who show favour to the people, prosper, and there is no doubt that by the destruction of the people they (themselves) are destroyed. ५ Enjoying happiness. भाज् (from भज् 1 A.) has this sense, as a latter part of compounds. ६ तस्मिन् एव = तस्मिन्नेव. ७ Free from fear. निर्गतं भयं येभ्यः ते निर्भयाः. ब. ८ Having absence of desire as regards the objects of this world. ९ Engrossed in grief. १० Afraid of the destruction of son and wife.

वा तेषां मध्याह्नस्याहारार्थं मध्याह्नसमय उपतिष्ठते। अथ कदाचि-
ज्जातिक्रमाच्छशकस्य वारः समायातः। स समस्तमृगैः प्रेरितोऽनि-
च्छन्नपि मन्दं मन्दं गत्वा तस्य बधोपायं चिन्तयन्जातिक्रमं कृत्वा
व्याकुलितहृदयो यावद्गच्छति तावन्मार्गे गच्छता कूपः सुदृष्टः। या-
वत्कूपोपरि याति तावत्कूपमध्य आत्मनः प्रतिबिम्बं ददर्श। तेन
हृदये चिन्तितं यद्भव्य उपायोऽस्ति। अहं भासुरकं प्रकोप्य स्वबु-
ध्याऽस्मिन्कूपे पातयिष्यामि। अथासौ दिनशेषे भासुरकसमीपं
प्रातः। सोऽपि वेलातिक्रमेण क्षुत्क्षामकण्ठः कोपाविष्टः मृकणी
पार्श्वलिहद्दृश्यचिन्तयत्। अहो प्रातर्गृहीतायं निःसत्त्वं वनं मया कर्त-
व्यम। एवं चिन्तयंस्तस्य शशकं मन्दं मन्दं गत्वा प्रणम्य तस्याग्रे
स्थितः। अथ तं प्रज्वलितात्मा भासुरकं भर्त्सयन्नाह। रे शश-
काधम एकं तावत्त्वं लघुः प्रातःप्रं वेलातिक्रमेण तदस्मादपराधाच्चां
निपात्य प्रातः सकलान्यपि मृगकुलान्युच्छेदयिष्यामि। अथ श-
शकः सविनयं प्रोवाच। स्वामिन्नापराधो मम न च सत्त्वानाम्।

---

१ According to the order of the kinds of animal already fixed. २ Turn; time. ३ Though unwilling, against his will. ४ Slowly and slowly. ५ Of the lion (सिंहस्य). ६ Having transgressed the proper time of going there, *i. e.*, having gone late. ७ As soon as he went over to the mouth of the well. ८ Reflection, image. ९ Excellent; right. १० Having excited the anger of (abs. of the caus. of कुप् 4 P. with प्र). ११ At the conclusion or end of the day. ष. त. १२ With his throat parched with hunger. क्षुधा क्षामः कण्ठः यस्य. ब १३ Licking the corners of the mouth. It is a sign of one's being very hungry. १४ For (my) food in the morning. १५ Void of all animals (सत्त्व). निर्गतानि सत्त्वानि यस्मात्. ब. १६ While he was thus thinking. (Gen. absolute construction) १७ With the soul inflamed or burning with anger. प्रज्वलितः आत्मा यस्य सः. ब. १८ Abusing, scolding. १९ The worst of hares. २० Firstly and secondly, in the first place and in the second place. २१ For this fault. The ablative shows cause or reason. २२ The tribes or families of the beasts.

तच्छ्रूयतां कारणम् । सिंह आह । मत्वरं निवेदय यावद्दंष्ट्रान्तर्गतो न भवसीति । शशक आह । समस्तमृगैरस्य स्वामिज्ञातिक्रमेण मम लघुतरस्य प्रस्तावं विज्ञाय ततोहं पञ्चशशकैः समं प्रेषितः । ततश्चाहमागच्छन्नन्तराले महता केनचिद्बलेन सिंहेन विवराभिर्गत्याभिहितः । रे क्व प्रस्थिता यूयम । अभीष्टदेवतां स्मरत । ततो मयाभिहितम् । वयं स्वामिनो भासुरकस्य सिंहस्य सकाश आहारार्थं समयधर्मेण गच्छामः । ततस्तेनाभिहितम । यद्येवं तर्हि मैदीयमेतद्वनं मया सह समयधर्मेण सर्वैः श्वापदैर्वर्तितव्यम । चौरोरूपी स भासुरकः । अथ यदि सोत्र राजा ततो विश्रामस्थाने चतुरः शशकानत्र धृत्वा तमाहूय द्रुततरमागच्छ मेन द्वयोर्मध्याद्यः कश्चित्परागक्रमेण राजा भविष्यति स सर्वानेतान्भक्षयिष्यतीति । अतोहं तेनादिष्टः स्वामिसकाशमागतः । एतद्वैलाव्यतिक्रमकारणम् । तद्य स्वामी प्रमाणम् । तच्छ्रुत्वा भासुरक आह । भद्र यद्येवं तर्हि मत्वरं दर्शय मे तं चौरसिंहं येनाहं मृगकोपं तस्योपरि क्षिप्त्वा स्वस्थो भवामि । उक्तं च ।

"भूमिर्मित्रं हिरण्यं च विग्रहस्य फलत्रयम ।
नास्त्येकमपि यत्रैषां न तं कुर्यात्कथंचन ॥ २२६ ॥

---

१ Before you are placed between my jaws २ Turn, time of. ३ I was sent with four hares *i. e.* I was the fifth of those that were sent. ४ In the middle, on the way. ५ Mine, belonging to me. ६ Of a thievish disposition or nature. ७ Having kept here four of the hares as hostages. विश्रामस्थान lit. place of confidence, object of security. ८ Ordered, commanded. ९ That pretender lion, that imposter of a lion. १० Having thrown, or directed the anger I entertain for the beasts against him. ११ The (acquisition of) land, friends and gold, these are the three fruits of waging war (with others); when there is not even one of these to be obtained, one should not declare hostility (with others).

[1]यत्र न स्यात्कलं भूरि यत्र च स्यात्पराभवः ।
न तत्र मतिमान्युद्धं समुत्थाय समाचरेत् ॥ २२७ ॥

शशक आह । स्वामिन्सत्यमिदम् । स्वभूमिहेतोः [2]परिभवाच्च युध्यन्ते क्षत्रियाः । परं स [3]दुर्गाश्रयः । दुर्गान्निष्कम्य वयं तेन [4]विष्कम्भिताः । ततो [5]दुर्गगतो दुःसाध्यो भवति रिपुः । उक्तं च ।

[6]न गजानां सहस्रेण न च लक्षेण वाजिनाम् ।
यत्कृत्यं सिध्यति राज्ञां दुर्गेणैकेन विग्रहे ॥ २२८ ॥
[7]शतमेकोपि संधत्ते प्राकारस्थो धनुर्धरः ।
तस्माद्दुर्गं प्रशंसन्ति नीतिशास्त्रविचक्षणाः ॥ २२९ ॥
[8]पुरा गुरोः समादेशाद्विश्वकर्मणः ।
शक्रेण विहितं दुर्गं प्रभावाद्विश्वकर्मणः ॥ २३० ॥
[9][10]तेनापि च वरो दत्तो यस्य दुर्गं स भूपतिः ।
विजयी स्यात्ततो भूमौ दुर्गाणि स्युः सहस्रशः ॥ २३१ ॥

---

१ A wise man should not create a quarrel and wage war, when the fruit to be obtained from it is not considerable, and where defeat is certain. समुत्थाय (abs. of the caus. of पद with सम्). २ Warriors, brave persons. ३ One whose place of residence or shelter, is a fortress. दुर्गः आश्रयः यस्य. ब. ४ Obstructed, stopped. P. P. of स्कंभ् 1 A. 5, 9 P. with वि, ५ Gone into a fort, residing in a fort. दुर्गं गतः or दुर्गं गतः स or द्वि. त. ६ Difficult to be subdued or killed. ७ That thing which kings can accomplish in war by means of a fort alone, cannot be accomplished by a thousand elephants and by one hundred thousand horses. ८ Even a single archer is a match for a hundred when he is in a fort, therefore, those who are proficient in politics, praise a fort very highly. शतं-शतं धनुर्धराः. नीति...णा स. त. ९ Formerly Indra had a fort built by the power of Visvakarman (the builder of Gods) at the advice of his preceptor (Brihaspati) and through the fear of Hiranya Kasipu (a demon killed by Vishnu in his fourth incarnation, viz., that of नृसिंह). १० He (Indra) also gave a boon to the effect that the king, who has a fort, will be victorious! therefore, there are forts on the earth by thousands. Here स्युः = सन्ति.

[1]दंष्ट्राविहीनो नागो मदहीनो यथा गजः ।
सर्वैर्षां जायते वश्यो दुर्गहीनस्तथा नृपः ॥ २३२ ॥

तच्छ्रुत्वा भीसुरुक आह । भद्र दुर्गस्थमपि दर्शय तं चौरसिंहं येन व्यापादयामि । उक्तं च ।

[2]जातमात्रं न यः शत्रुं रोगं च प्रशमं नयेत ।
महाबलोपि तेनैव वृद्धिं प्राप्य स हन्यते ॥ २३३ ॥

तथा च । [3]उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता ।
समौ हि शिष्टैराम्नातौ वर्धमानावमयः स च ॥ २३४ ॥

अपि च । [4]उपेक्षितः क्षीणबलोपि शत्रुः
प्रमाददोषात्पुरुषैर्मदान्धैः ।
साध्योपि कृत्वा प्रथमं ततोमा-
वमाध्यतां व्याधिरिव प्रयाति ॥ २३५ ॥

तथा च । [5]आत्मनः शक्तिमुद्वीक्ष्य मानोत्साहं च यो व्रजेत ।
शत्रून्हन्ति स एकोपि क्षत्रियान्भार्गवो यथा ॥ २३६ ॥

---

१ As a cobra without fangs and an elephant without intoxication, are subdued, so is a king without a fort conquered by all. २ He, who does not extinguish an enemy and a disease as soon as they are born or produced, will, though very powerful, be killed by that enemy or that disease, when he or it grows strong. महाबल = महद्बलं यस्य स. ब. ३ A rising enemy should never be neglected by him who wishes his own welfare; for, he (the enemy) and a disease when about to increase, are said to be equal by *those whose opinion carries weight* (शिष्ट) आधात P. P. of आ with आ. वर्धमानो Future P. of वृध् which is optionally Paras. and takes no इ. ४ An enemy though weak and thus likely to be subdued in the beginning, becomes afterwards hard to overcome, like a disease, when he is neglected by men blinded with pride through the fault of carelessness or indifference. क्षीणबल. ब., प्रमादरोष-प्रमाद एव दोष. क., मदेन अंधा. त. ब. ५ He who will go to battle after rightly estimating his own strength and energy produced by self-reliance, will, though alone, kill his enemies, as *Bhárgava* (the descendant of the sage भृगु and the seventh incarnation of Vishnu) destroyed the Kshatriyas.

शशक आह । अस्त्येतत्तथापि तस्य सामर्थ्यमविदित्वा न युज्यते गन्तुम् । उक्तं च ।

[2]अविदित्वात्मनः शक्तिं परस्य च समुत्सुकः
गच्छन्नभिमुखो याति नाशं वह्नौ पतङ्गवत् ॥ २३७ ॥

[3]यो बलात्प्रोन्नतं याति निहन्तुं सबलोऽरिः ।
विमदः स निवर्तेत शीर्णदन्तो गजो यथा ॥ २३८ ॥

भासुरक आह । यद्यप्येवं तथापि त्वं दर्शये तं चौरसिंहं यथा व्यापादयामि । शशक आह । यद्येवं तर्ह्यागच्छतु स्वामी । एवमुक्त्वाग्रे [6]व्यवस्थितः । ततश्च तेनागच्छता यः कूपो दृष्टो भूतमेव कूपमामाय भासुरकमाह । स्वामिन्कस्ते [7]प्रतापं सोढुं समर्थः । त्वां दृष्ट्वा दूरेणापि चौरसिंहः प्रविष्टः स्वं दुर्गम् । तदागच्छ यथा दर्शयामीति । भासुरक आह । दर्शय मे दुर्गम् । तदनु दर्शितस्तेन कूपः । ततः सोपि मूर्खः सिंहः कूपमध्य आत्मप्रतिबिम्बं जलमध्यगतं दृष्ट्वा सिंहनाद[11]मुमोच । ततः प्रतिशब्देन कूपमध्याद्विगुणतरो [12]नादः समुत्थितैः । अथ तेन तं शत्रुं मत्वात्मानं [13]तस्योपरि प्रक्षिप्य प्राणाः परित्यक्ताः । शशकोपि हृष्टमनाः सर्वमृगानानन्द्य तैः सह प्रशस्यमानो यथासुखं तत्र वने निवसति स्म ॥

---

१ This is so, that is, what you say is just so still, &c. २ He who without knowing his own strength and also that of the enemy, *faces him with eagerness* (समुत्सुक अभिमुखो गच्छन्), meets with destruction, as a moth does in fire. ३ That enemy, though powerful, who goes forward to kill one who is elated with strength, will come back divested of his pride like an elephant who has his tusks broken in fight. ४ So that, in order that. ५ Lord, your majesty. ६ Went forward, proceeded forward. ७ Who is able to endure your might? ८ Thereupon. ९ Fallen into water. १० Roared (lit. uttered a lion's roar.) ११ Echo, reverberation. १२ Roar twice as loud as that made by the lion. १३ Arose. १४ Throwing himself upon him. १५ Having pleased or gladdened. (abs. of नन्द् with आ.) १६ Being extolled by them. Pro. P. of शंस् with प्र. P. १७ As it pleased him, at his pleasure.

अतोहं ब्रवीमि यस्य बुद्धिर्बलं तस्येति ।

तथदि भवान्कथयति तत्रैव गत्वा तयोः स्वबुद्धिप्रभावेण भेदं करोमि । करटक आह । भद्र यद्येवं तर्हि गच्छ । शिवास्ते पन्थानः सन्तु । यथाभिप्रेतमनुष्ठीयताम् । अथ दमनकः संजीवकं विसृष्टं पिङ्गलकमवलोक्य तत्रान्तिरं प्रणम्याग्रे समुपविष्टः । पिङ्गलकोपि तमाह । भोः कस्माच्चिरादृश्यसे । दमनक आह । न किंचिद्देवपादानामस्मदभिः प्रयोजनं तेन नागच्छामः । तथापि राजप्रयोजनविनाशमवलोक्य संदह्यमानहृदयो व्याकुलतया स्वयमेवाभ्यागतो वक्तुम् । उक्तं च ।

शुभं वा यदि वा पापं द्वेष्यं वा यदि वा प्रियम् ।
अपृष्टस्यास्य तद्ब्रूयाद्यस्य नेच्छेत्पराभवम् ॥ २३९ ॥

अथ तस्य साभिप्रायं वचनमाकर्ण्य पिङ्गलक आह । किं वक्तुमना भवान् । तत्कथ्यतां यत्कथनीयमस्ति । स आह । देव संजीवको युष्मत्पादानामुपरि द्रोहबुद्धिरिति । विश्वासगतस्य मम विजेन इदमाह । दमनक दृष्टस्य पिङ्गलकस्य सारासारज्ञा । तदहमेन हत्वा सकलमपि मृगाधिपत्यं त्वत्साचिव्यसमन्वितं करिष्यामि । पिङ्गलकोपि

---

१ A breach of friendship २ Do as you like, please yourself ३ Separated from Sanjivaka तृ त ४ In that interval, viz., during which the bull was absent तस्मिन्नन्तरे ५ Your Majesty (lit. your Majesty's feet) has no need of us. ६ For that reason. ७ The destruction or ruin of the king's interest ८ Burning (with grief) at heart सदह्यमाने हृदयं यस्य ब. ९ Of myself, of my own accord. १० Even when not asked, one should say that to him whose defeat he does not wish, whether it be good or evil, or whether hateful or pleasing. तस्य ब्रूयात् = तस्मै तृ. Gen for Dat. ११ Full of some motive, underlying some purpose. अभिप्रायेण सह. ब. १२ Sanjivaka entertains evil designs against your Majesty. द्रोहबुद्धि-द्रोहाय बुद्धिर्यस्य. ब. १३ In private, in secret. १४ Strength (सारता) and weakness (असारता) or strong and weak points. १५ The sovereignty over all the beasts. १६ Furnished or accompanied with your ministership. त्वत्सा...तं = तव साचिव्येन समन्वितं. तृ. त. The meaning is I shall be the lord of the forest, and make you my chief minister of state.

तद्वज्रसारप्रहारसदृशं दारुणं तद्वचः समाकर्ण्य मोहमुपागतो न किंचिदूचे । स दमनकोपि तस्य तमाकारमालोक्य चिन्तितवान् । अयं तावत्संजीवकनिबद्धरागस्तन्नमनेन मन्त्रिणा राजा विनाशमवाप्स्यतीति । उक्तं च ।

[6]एकं भूमिपतिः करोति सचिवं राज्ये ममाणं यदा
तं मोहाच्छ्रयते मदः स च मदाद्दास्येन निर्विद्यते ।
निर्विण्णस्य पदं करोति हृदये तस्य स्वतन्त्रस्पृहा
स्वातन्त्र्यान्नृपतेः स राज्यमथवा प्राणानपि च्यावयेत् ॥२४०

किमत्र युक्तमिति । पिङ्गलकोपि चेतनो ममामात्य कर्थमपि तमाह । दमनक संजीवकस्तावत्प्राणसमो भृत्यः स कथं ममोपरि द्रोहबुद्धिं करोति । दमनक आह । देव भृत्योभृत्य[10]इत्यनैकान्तिकमेतत् । उक्तं च ।

[11]न सोस्ति पुरुषो राज्ञां यो न कामयते श्रियम् ।
अशङ्का एव सर्वत्र नरेन्द्रं पर्युपासते ॥ २४१ ॥

---

१ Re-embling the strokes of adamant. त्र. त. २ Fainted, swooned. ३ Form, appearance. ४ One whose attachment is fixed on Sanjivaka. संजीवके निबद्ध रागः यस्य. ब. ५ With this as minister, with such a minister as this. ६ When a king makes any minister as the sole authority in the kingdom, pride takes possession of him (minister) through infatuation, and through pride he becomes disgusted with servitude, when dissatisfied, a desire for independence arises in his mind and through independence (with the desire of getting independence) he will deprive the king of his kingdom or even his life. हृदये पदं करोति makes a footing in the mind. स्व...हा-स्वतंत्रा स्पृहा. क. स्वातन्त्र्यात् Pot. of the caus. of √भू 1 A. ७ Having recovered consciousness. ८ Any how, with great difficulty. ९ As to Sanjivaka, he is a servant as dear to me as life itself. १० The fact of his being a servant or non-servant, is not the question at issue, is not the point under discussion. एकान्तिक adj. conclusive and so अनैकान्तिक non-conclusive; proving nothing. ११ There is no man who does not desire wealth from kings; the weak alone wait upon a king every where. The words राज्ञां श्रियं should be construed together.

पिङ्गलक आह । भद्र तथापि मम वस्योपरि[1] चित्तवृत्तिर्न विकृतिं याति । अथवा साध्विदमुच्यते ।

[2]अनेकदोषदुष्टोपि कायः कस्य न वल्लभः ।
कुर्वन्नपि व्यलीकानि यः प्रियः प्रिय एव सः ॥ २४२ ॥

दमनक आह । [3]अतं एवायं दोषः । उक्तं च ।

[4]यस्मिन्नेवाधिकं चक्षुरारोपयति पार्थिवः ।
अकुलीनः कुलीनो वा स श्रियो भाजनं नरः ॥ २४३ ॥

अपरं केन[5] गुणविशेषेण स्वामी संजीवकं निर्गुणंकमपि निकटे[6] धारयति । [7]अथ यथेवं चिन्तयसि महाकायोयमनेन रिपून्व्यापादयिष्यामि तदस्माभ्र सिध्यति यतोयं शष्पभोजी देवपादानां शस्त्रवो मांसाशिनः । तद्रिपुसाधनस्य साहाय्येन न भवति । तस्मादेनं दूषयित्वा हन्यतामिति । पिङ्गलक आह ।

---

१ My feelings (चित्तवृत्ति) towards him will undergo no change. २ To whom is not the body though spoiled by various defects dear? He who is dear to one is ever so, though he commit faults or wrongs. अनेक...दुष्टः न. त. ३ For this very reason it is a fault; this state of your feelings towards him is the cause of his evil intentions towards you. ४ That man, whether low-born or nobly-born, for whom the king shows special regard, becomes the receptacle of wealth or prosperity. अधिकं चक्षुरारोपयति-pays more attention. भाजनं a pot. ५ For what special merit or quality? गुणानां विशेष प. त. ६ Though destitute of merits or virtues. न संति गुणा यस्य स. ब. ७ Holds near, keeps near. ८ If you think, "he is large-bodied, I shall kill my enemies at his hands," that too will not be accomplished through him, since he is a grass-eater, while your Majesty's enemies are flesh eaters. ९ Subjugation, conquest. १० Having accused of crime. (abs. of the caus. of दुष् 4 P.) ११ One would expect जहि here, or अयं in place of एनं. It should, therefore, be either तस्मात्त दूषयित्वा हन्यताम् or तस्मादेनं दूषयित्वा जहि.

[1]उक्तो भवति यः पूर्वं गुणवानिति संसदि ।
तस्य दोषो न वक्तव्यः प्रतिज्ञाभङ्गभीरुणा ॥ २४४ ॥

अन्यच्च । मयास्य[2] तव[3]वचनेनाभयप्रदानं दत्तम् । तत्कथं स्वयमेव व्यापादयामि । सर्वथा संजीवकोयं सुहृदस्माकं न[4] प्रति[5]कश्चिन्मन्युरिति । उक्तं च ।

[6]इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम् ।
विषवृक्षोपि संवर्ध्य स्वयं छेत्तुमसांप्रतम् ॥ २४५ ॥

[7]आदौ न वाप्रणयिनां प्रणयो विधेयो
दत्तोथवा प्रतिदिनं परिपोषणीयः ।
उत्क्षिप्य यत्क्षिपति तत्प्रकरोति लज्जां
भूमौ स्थितस्य पतनाद्भयमेव नास्ति ॥ २४६ ॥

[8]उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ।
अपकारिषु यः साधुः स साधुः सद्भिरुच्यते ॥ २४७ ॥

---

१ One who is afraid of violating his promise should not mention the fault of him whom he has once said to be meritorious in an assembly, *i. e.*, publicly. प्रतिज्ञा...णा. पं. न. प्रतिज्ञाभङ्गात् भीरुणा. २ अस्य = अस्मै. ३ At your advice or recommendation. ४ I have no ill-feeling of any kind against him. ५ That demon has derived his glory *from this* (from me) and so he does not deserve to have his destruction from here (me); it is not proper for one to cut down even the tree of poison which one has reared with one's own hands. The construction of line 2 should be explained by saying that संवर्ध्य is the absolutive of the passive of वृध् with सम् छेत्तुमसांप्रतम् = न छेत्तव्यः. ६ In the first place no love at all should be shown to friends, but when once shown (दत्त), it should be increased every day; that a thing should be first elevated and then thrown down, produces shame, for one who is already *on the ground* (low) has no fear of a fall क्षिपति has for the subject कश्चिदपि. ७ What credit is to be given to the goodness of him who is good to those who have conferred obligations on him; he is said to be really a साधु (saint) by the good, who is really so (good) towards those who have injured him.

[1]तद्दोहबुद्धेरपि मयास्य विरुद्धं नाचरणीयम् । [2]मनक आह । [3]अभिप्रेष धर्मो[4]यद्दोहबुद्धेरपि क्षम्यते । [5]उक्तं च ।

[6]तुल्यार्थं तुल्यसामर्थ्यं मर्मज्ञं व्यवसायिनम् ।
अर्धराज्यहरं भृत्यं यो न हन्यान्स हन्यते ॥ २४८ ॥

अपरं त्वयास्य [7]मन्त्रिवात्मवोपि राजधर्मः परित्यक्तो राजधर्मभावात्मवोपि परिजनो विरक्तिं गतो यतः [8]मंजीवकः शष्पभोजी त्वान्मांसादस्तव [9]नैकतयश्च । [10]यतवावश्यव्यवसायवात्यं कुतस्तामां मांसाशनम् । यद्दैहितास्त्वां त्यक्ता यास्यन्ति । [11]तैतोपि त्वं क्षेनष्ट एव । अस्य संगत्या पुनस्ते न कदाचिद्दीखेटके मतिर्भविष्यते । उक्तं च ।

[12]यादृशैः सेव्यते मर्त्यो यादृशांश्चैव सेवते ।
कदाचिन्नात्र संदेहस्तादृग्भवति पूरुषः ॥ २४९ ॥

---

१ I shall not or cannot act against him even though he con-pire against my life. २ Forgiveness is shown to one who is ill disposed towards you. ३ He, who does not kill a servant whose wealth is equal, whose strength is equal (to his own), who knows the weak points, who is indu-trious and who deprives him of half his kingdom, is killed by him in his turn. तुल्यार्थं and तुल्यसामर्थ्यं are न and मर्मज्ञ and अर्धराज्यहर. इत्. ४ In consequence of your friend-ship for him. ५ By reason of your not discharging your duties as a king. ६ Flesh-eater. मांस अत्ति मांसाद. ७ Here con-true यत (मांसाशनं) तव कथ्यव्यवसायवाद् तत् तामा (प्रकृतीनां) कुत Whence can those subjects get flesh to eat, since it is foreign or contrary to your *determination of not killing* (अवध्यव्यवसाय)? that is, since you are resolved upon not killing any beasts, how can the subjects eat flesh? ८ यत मांसाशनेन रहिता.—when they have no flesh to eat. ९ In that case also. १० Will never have any inclination for hunting or chase. ११ There is no doubt that a man becomes exactly like those by whom he is served, and those whom he serves. After

तथा च। [1]संतप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते ।
स्वातौ सागरशुक्तिसंपुटगतं तज्जायते मौक्तिकं
प्रायेणाधममध्यमोत्तमगुणः संवासतो जायते ॥२५०॥

तथा च। [2]असतां सङ्गदोषेण साधवो यान्ति विक्रियाम् ।
दुर्योधनप्रसंङ्गेन भीष्मो गोहरणे गतः ॥ २५१ ॥

अत एव सन्तो नीचसङ्गं वर्जयन्ति । उक्तं च[3]।
[4]न ह्यविज्ञातशीलस्य प्रदातव्यः परिश्रयः ।
मत्कुणस्य च दोषेण हता मन्दविसर्पिणी ॥ २५२ ॥

पिङ्गलक आह । कथमेतत् । सोऽब्रवीत ।

॥ कथा ९ ॥

अस्ति कस्यचिन्महीपतेर्मनोरम[5] शयनस्थानम । तत्र श्वेततरपटयुगलमध्यसंस्थिता मन्दविसर्पिणी यूका[6] प्रतिवसति स्म । सा च तस्य

---

१ Even the name of the water that falls heated on iron is not known, or is not left; that very water, when it stands on the leaf of a lotus, shines with the lustre of pearls; when under the *Svāti Nakshatra* it falls into the cavities of sea-shells it is turned into pearls; generally the quality of being low, middling and best is acquired from association. नामापि may also mean-even a trace &c. In Bhartṛihari's Nitiśataka from which this verse is taken, the reading for the third line is rather different. स्वात्यां सागरशुक्तिमध्यपतितं सन्मौक्तिकं जायते. अधम...गुण.—अधमश्च, मध्यमश्च, उत्तमश्चासौ गुणः. क. २ As a consequence of the fault of associating with the wicked, the good undergo change of disposition, *Bhishma* went with the party sent for stealing the cows (of Virāta) by associating with Duryodhana. संगदोष = क. दुर्योधनेन प्रसंगः तृ. त. ३ No shelter should be given to him whose dispositon is not known, a louse called मंदविसर्पिणी was killed for the fault of a bug. अवि...शील. क. ४ Pleasing the mind, charming. ५ Whiter. Here तर has no propriety since it is not said to be whiter than any thing. ६ A louse.

[illegible]षते रक्तमास्वादयन्ती सुखेन कालं क्षपयमाना तिष्ठति। अन्येद्युश्च [illegible] शयने क्वचिदभ्याग्यन्नग्निमुखो नाम मत्कुणः समायातः। अथ तं [illegible] सा विषण्णवदना प्रोवाच। भो अग्निमुख कुतस्त्वमत्रानुचित- [illegible] समायातः। तत्रावस्त्र कश्चिद्वेत्ति तावच्छीघ्रं गम्यतामिति। स [illegible] ह। भगवति गृहागतस्यासाधोरपि नैतद्युज्यते वक्तुम। उक्तं च।

ऐह्यागच्छ समाश्वसासनमिदं कस्माद्विराद्दृश्यसे
का वार्त्ता अतिदुर्बलोसि कुशलं प्रीतोस्मि ते दर्शनात्।
एवं नीचजनेपि युज्यति गृहं प्राप्ते सतां सर्वदा
धर्म्यायं गृहमेधिनां निगदितः स्मार्तैर्लघुः स्वर्गदः॥ २५३॥

अपरं मयानेकमानुषाणामनेकविधानि रुधिराण्यास्वादितान्याहा- [illegible] तिक्तकटुतिक्तकषायाम्ललवणास्वादानि न च कदाचिन्मधुरक्तं समा- [illegible] दितम। तयदि त्वं प्रसादं करोषि तदस्य नृपतेर्विविधव्यञ्जनान्न- [illegible] पानचोष्यलेह्यस्वाद्वाहारस्वादस्य शरीरे यस्मिंष्टं रक्तं संजातं तदा- स्वादनेन सौख्यं संपादयामि जिह्वाया इति। उक्तं च।

---

१ Continued to pass her time &c. २ In that bed. तस्य = तस्मिन्. ३ Before any one knows or finds you out. ४ Even to a man who is wicked. ५ Come, take heart, here is a seat, why do you come after a long time, what is the news, you are very feeble, is it well with you, I am pleased at seeing you; this mode of reception is always fit to be accorded even to a low person when he goes to the house of the good; this is recorded as the duty of hou-sholders by those who are versed in traditional law, and though trifling, it secures heaven (for the doer). समाश्वस for समाश्वसिहि. The root is here used in the 1st conjugation. After कुशलं supply अस्ति किम् or अपि before it. युज्यति is used for युज्यते. स्वर्गदः=स्वर्गं ददातीति ६ Having the taste of bitter, pungent, astringent and sour juices कटुतिक्त ...म्लरसानां आस्वादो यस्मिन् तानि (रुधिराणि). ७ If you do me favour, or show me favour. ८ On account of his tasting sweet food, drink, things to be sucked and things to be licked, and full of condiments (व्यंजन) of various kinds. विविधव्यंजन is a Bahu. compound qualifying अन्न, पान &c. विविधव्यंजन...लेह्य-स्वादु- तृ. त. and स्वादु आहार, क. ९ Sweet, savoury. १० Obtain, get.

[1]रङ्कस्य नृपतेर्वापि जिह्वासौख्यं समं स्मृतम् ।
तन्मात्रं च स्मृतं सारं तदर्थं यतते जनः ॥ २५४ ॥

[2]यथेव न भवेल्लोके कर्म जिह्वाप्रतुष्टिदम् ।
तत्र भृत्यो भवेत्कश्चित्कस्यचिद्वशगोऽथवा ॥ २५५ ॥

[3]यदसत्यं वदेन्मर्त्यो यद्वासेव्यं च सेवते ।
यद्गच्छति विदेशं च तत्सर्वमुदरार्थतः ॥ २५६ ॥

तन्मया गृहागतेन बुभुक्षयाँ पीड्यमानेनापि त्वत्सकाशाद्भोजनं लब्धम् । तत्र त्वयैकाकिन्यास्य भृपते रक्तभोजनं कर्तुं युज्यते । तच्छ्रुत्वा मन्दविसर्पिण्याह । भो मत्कुण अस्य नृपतेर्निद्रावशं [6]गतस्याहं रक्तमास्वादयामि पुनस्त्वमग्निमुखश्चपलश्च । तयदि मया सह रक्तपानं करोषि तर्हि । अभीष्टतररक्तमास्वादय । सोऽब्रवीत । भगवति एवं करिष्यामि । [7]यावत्त्वं नास्वादयसि प्रथमं नृपरक्तं तावन्मम देवगुरुकृतः शपथः स्याद्यदि तदास्वादयामि । एवं तयोः परस्पर वदतोः स राजा तच्छ्रवणमात्राय प्रसुप्तः । अथामौ मत्कुणौ

---

१ The pleasure of the tongue in the case of a beggar and also in that of a king, is said to be equal; that much alone is the essence of eating and people strive for obtaining that alone. २ If there be no such thing in the world as gratifies the tongue, no one will be anybody's servant or under the control of any one जिह्वायाः प्रतुष्टिः = जिह्वाप्रतुष्टिः ता ददातीति. उप. ३ That a man speaks untruth, serves him who is not fit to be served and goes to a foreign country, is all for the sake of the belly. ४ Desire to eat and hence hunger. (desid. noun from भुज् 1 A.) ५ Meals consisting of blood. ६ When under the power of sleep; when asleep. ७ You, however, are fire-mouthed or hot-mouthed and very hasty or uncontrolled (and may thus awaken the king by your sharp bite). ८ More blood than you desire to drink अभीष्टतरं रक्तं. ९ I swear to you by my god and preceptor that I shall not taste the king's blood before you have first done it yourself.

जिह्वालौल्योत्कृष्टौत्सुक्याज्जाग्रतमपि[1] तं महीपतिमदशत। अथवा साध्विदमुच्यते।

[2]स्वभावो नोपदेशेन शक्यते कर्तुमन्यथा।
सुतप्तमपि पानीयं पुनर्गच्छति शीतताम्॥ २५७॥
[3]यदि स्याच्छीतलो वह्निः शीतांशुर्दहनात्मकः।
न स्वभावोऽत्र मर्त्यानां शक्यते कर्तुमन्यथा॥ २५८॥

अथासौ महीपतिः सूच्यग्रविद्ध इव तच्छयनं त्यक्त्वा तत्क्षणादेवोत्थितः। अहो ज्ञायतामत्र प्रच्छादनान्तरे[4] मत्कुणो यूका वा नूनं तिष्ठति येनाहं दष्ट इति। अथ ये कञ्चुकिनस्त्रस्तास्ते सत्वरं प्रच्छादनपटं गृहीत्वा मुहुरदृष्ट्वा वीक्षांचक्रुः। अत्रान्तरे स मत्कुणश्चपलत्वाद्वान्तं[5] प्रविष्टः। सा मन्त्रिविमर्षिण्यपि वस्त्रसंधर्न्तर्गता तैर्दृष्टा व्यापादिता च॥

अतोऽहं ब्रवीमि न ह्यविज्ञातशीलस्येति।

एवं ज्ञात्वा त्वयैष वध्यः। नो चेत्त्वां व्यापादयिष्यति। उक्तं च।

[11]त्यक्ताशाभ्यन्तरा येन बाह्याश्चाभ्यन्तरीकृताः।
स एव मृत्युमाप्नोति यथा राजा ककुद्रुमः॥ २५९॥

पिङ्गलक आह। कथमेतत्। सोऽब्रवीत्।

---

१ Through eagerness urged on by the greediness of tongue. जिह्वालौल्योत्कृष्ट. त. त जिह्वालौल्योत्कृष्ट औत्सुक्ये. क. २ Even while he was awake. ३ It is not possible to change (do otherwise) one's disposition by means of advice; water though well-heated becomes cool again. ४ Even if fire be cool and the moon burning hot, still the disposition of men cannot be changed, that is, it may perhaps be possible for the fire to be &c. but not possible for the disposition to be altered. शीतांशु-शीतांशवः. अंशव. यस्य ब. ५ As if pricked with the point of a needle. ६ In the cloth used for covering; in the coverlet. ७ With a minute search. ८ Examined. विशेषण ईक्षां चक्रुः. The root ईक्ष is generally conjugated in the Atmanepada. ९ Meanwhile. अस्मिन्नन्तरे. १० Entered a crevice in the cot. ११ Lying concealed at the joining of two pieces of garments. १२ He who has left off intimate friends and has made friends of strangers, will surely meet with death, as did the king ककुद्रुम (in the following story).

॥ कथा १० ॥

अस्ति कस्मिंश्चिद्वनोद्देशे चण्डरवो नाम शृगालः[1] । स कदाचित्क्षुधाविष्टो जिह्वालौल्यान्नगरमध्ये प्रविष्टः । अथ तं सारमेया विलोक्य सर्वतः शब्दायमानाः परिधाव्य तीक्ष्णैर्दन्तैर्भक्षयितुमारब्धाः[2][3][4][5] । सोपि तैर्भक्ष्यमाणः प्राणभयात्प्रत्यासन्नं रजकगृहं प्रविष्टः[6] । तत्र नीलीरसैंपरिपूर्णमहाभाण्डमासीत् । तत्र सारमेयैराक्रान्तो भाण्डमध्ये पतितः[7] । अथ यावन्निष्क्रान्तस्तावन्नीलीवर्णः संजातः[8][9] । तत्रापरे सारमेयास्तं[10] शृगालमजानन्तो यथाभीष्टदिशं जग्मुः । चण्डरवोपि दूरतरं प्रदेशमासाद्य काननाभिमुखं प्रतस्थे न च नीलवर्णेन कदाचिन्निजैर्[11]द्रुस्थज्यते । उक्तं च ।

[12]वज्रलेपस्य मूर्खस्य नारीणां कर्कटस्य च ।
एको ग्रहस्तु मीनानां नीलीमद्यपयोर्यथा ॥ २६० ॥

अथ तं हरगलगरलतमालसमप्रभमपूर्वं सत्त्वमवलोक्य सर्वे सिंहव्याघ्रद्वीपिवृकप्रभृतयोरण्यनिवासिनो भयव्याकुलितचित्ताः सम-

---

१ When he was once overtaken by hunger. २ Dogs. सारमेय = सरमाया अपत्यं पुमान. Saramâ was the bitch of Gods and सारमेय is, therefore, a patronymic from सरमा. ३ Making a noise, that is, barking. ४ With their pointed teeth. ५ To tear, to devour. ६ Into the house of a washerman that was at hand. प्रत्यासन्नं च तत् रजकगृहं. क. ७ The juice of the Indigo plant. ८ Seized or caught. ९ Of the colour ofindigo. नीलया वर्णः इव वर्णः यस्य सः. ब. १० Not knowing him to be a jackal. ११ Its own colour was not abandoned; it was not removed. १२ One is the grasp (or final is the grasp) of वज्रलेप, of a fool, of women, of a crab, of fishes and also of the colour indigo and of a drunkard, that is, when these have once clung fast to any thing, they do not leave it. वज्रलेप is a kind of cement prepared with diamond and other things. नीली च मद्यपश्च = नीलीमद्यपौ तयोः नीलीमद्यपयोः. १३ Resembling in colour the Tamâla tree which is as dark as the poison in the neck of हर (S'iva) हरगलगरल तमाल. क. हरगलगरल इव तमालः तेन समा प्रभा यस्य सः. तं. ब. १४ द्वीपिन् A panther.

ज्ञात्मलायनक्रियां कुर्वन्ति कथयन्ति च । न ज्ञायतेस्य कीदृग्विचेष्टितं[1] पौरुषं च । तद्गुरुतरं गच्छामः । उक्तं च ।

[2]न यस्य[3]चेष्टितं विद्यान्न कुलं न पराक्रमम् ।
न तस्य विश्वसेत्प्राज्ञो यदीच्छेच्छ्रियमात्मनः ॥ २६१ ॥

चण्डरवोपि भयव्याकुलितान्विज्ञायेदमाह । भो भोः श्वापदाः किं यूयं मां[4]दृष्ट्वैव संत्रस्ता व्रजथ । तन्न भेतव्यम् । अहं ब्रह्मणाय स्वयमेव सुदृष्टाभिहितः । यच्छ्वापदानां कश्चिद्राजा नास्ति तत्त्वं मयाय सर्वश्वापदप्रभुत्वेभिषिक्तस्ततो गत्वा तान्सर्वान्परिपालयेति । ततोहमत्रागतः । तन्मम[5]च्छत्रच्छायायां सर्वैरपि श्वापदैर्वर्तितव्यम् । अहं ककुद्मो नाम राजा त्रैलोक्येपि संजातः । तच्छ्रुत्वा सिंहव्याघ्रपुरःसराः श्वापदाः स्वीमिन्प्रभो ममादिशेति वदन्तस्तं परिवव्रुः[6]" । अथ तेन सिंहम्यामा[7]त्यपदवी प्रदत्ता व्याघ्रस्य शार्द्दूलपालकत्वं द्वीपिनस्ताम्बूलाधिकारे वृकस्य द्वारपालकत्वम् । ये चौन्मीयाः शृगालास्तैः सहालापमात्रमपि न करोति । शृगालाः सर्वेपि निःसारिताः । एवं तस्य राज्यक्रियया वर्तमानस्य सिंहादयो मृगान्व्यापाय तत्पुरतः प्रक्षिपन्ति । सोपि प्रभुधर्मेण[8] सर्वेषां तान्प्रविभज्य प्रयच्छति । एवं गच्छति काले कदाचिद्वृद्धदेशे शब्दायमानाः शृगाला आकर्णिताः ।

---

१ Say among them-selves. २ Action. ३ If a wise man wishes for prosperity he should not put faith in him whose actions, family and exploits he does not know विश्वसेत् = विश्वस्यात्. ४ Knowing (them) to be overcome with fright. ५ Only by seeing me, only at my sight ६ Being created. Here सृष्ट has a passive force ७ Have been crowned as the sovereign of all beasts. ८ Under the shade of my umbrella as kingt, hat is, under my protection as your king. ९ With the lion and tiger a- the foremost सिंहव्याघ्री पुरःसरौ यस्यां ते (श्वापदाः) १० O lord, oh liege. ११ Surrounded him Perf of वृ with अभि. १२ The dignity or post of minister. १३ The office of looking after the bed. १४ The office of carrying the betel-nutbox. १५ The office of door-keeper. १६ His own caste-animals. १७ While he was thus carrying on the duties of a king. १८ As is the duty of a lord. १९ Has connection with प्रयच्छति २० Howling. Pre. P. of शब्दाय denom. from शब्द

वर्षां शब्दं श्रुत्वा पुलकिततनुर्नानन्दाश्रुपूर्णनयनस्तारस्वरेण विरोतुमारब्धः । अथ ते सिंहादयस्तं तारस्वरमाकर्ण्य शृगालोयमिति मत्वा लज्जयाधोमुखाः क्षणं स्थित्वा प्रोचुः । भो वाहिता अनेन वयम । क्षुद्रशृगालोयम । तद्वध्यतामिति । सोपि तदाकर्ण्य पलायितुमिच्छंस्तत्रैव स्थान एव सिंहादिभिः खण्डशःकृतो मृतश्च ॥

अतोहं ब्रवीमि त्यक्ताश्वाभ्यन्तरं येनेति ।

तदाकर्ण्य पिङ्गलक आह । भो दमनक कः प्रत्ययोत्र विषये यतः स ममोपरि दुष्टबुद्धिः । स आह । यदेष ममाग्रे तेन निश्चयः कृतो यत्प्रभाते पिङ्गलकं वधिष्यामि तदत्रैव प्रत्ययः । प्रभातेवसर-वेलायामारक्तनयनः स्फुरिताधरो दिशोवलोकयन्ननुचितस्थानोपविष्टस्त्वां क्रूरदृष्ट्यावलोकयिष्यति । तदेवं ज्ञात्वा यदुचितं तत्कर्तव्यमिति कथयित्वा संजीवकसकाशं गतः । तं प्रणम्योपाविष्टः । संजीवकोपि सादरंगीकारं मन्दगत्या समायान्तं तमुद्वीक्ष्य सादरतरमुवाच ! भो मित्र स्वागतम । चिरदृष्टोसि । अपि शिवं भवतः । तत्कथय यनादेयमपि तुभ्यं गृहायाताय प्रयच्छामि । उक्तं च ।

---

१ With the body covered with the hair standing on end through delight, आनन्देन पुलकिता तनुर्यस्य ब. २ With the eyes filled with the tears of joy आनन्दाश्रुभिः पूर्णे नयने यस्य ब. ३ In a shrill or loud tone. ४ To cry, to howl ५ With the heads hung down (through shame) अधः मुखानि येषां. ब. ६ We have been used as menials by him that is, we have been made to carry burdens by him P. P. of the caus. of वह 1 P. ७ तस्मिन्स्थाने एव On the very spot, then and there. ८ Was cut to pieces ९ What proof or evidence is there in this case? viz. that he is &c १० Since, because ११ For हर्तुमिच्छामि. १२ अस्मिन्नेव प्रत्ययः Herein alone lies the proof that you demand. १३ At the time when there is a *favourable opportunity* (अवसर). अवसरस्य वेलायां. ष त. १४ With reddish eyes. आरक्ते (ईषद्रक्ते) नयने यस्य स. ब १५ With the lowerlip throbbing. स्फुरितः अधर यस्य. ब १६ Seated in a place above his rank. १७ With cruel looks. १८ With a dejected appearance or look, ब. १९ Welcome २० Are you well? २१ Even that thing which cannot be given.

[1]ते अन्यास्ते विवेकज्ञास्ते शस्या इह भूतले ।
आगच्छन्ति गृहे येषां कार्यार्थं सुहृदो जनाः ॥ २६२ ॥

दमनक आह । भोः [2]कथं शिवं सेवकजनस्य ।

[3]आयत्तयः परायत्ताः सदा चित्तमनिर्वृतम् ।
स्वजीवितेष्वविश्वासस्तेषां ये राजसेवकाः ॥ २६३ ॥

तथा च । [4]सेवया धनमिच्छद्भिः सेवकैः पश्य यत्कृतम् ।
स्वातन्त्र्यं यच्छरीरस्य मुहूर्त्तादपि हारितम् ॥ २६४ ॥

[5]तावज्जन्मादिदुःखाय ततो दुर्गतता सदा ।
तत्रापि सेवया वृत्तिरहो दुःखपरंपरा ॥ २६५ ॥

[6]जीवन्तोऽपि मृताः पञ्च श्रूयन्ते किल भारते ।
दरिद्रो व्याधितो मूर्खः प्रवासी नित्यसेवकः ॥ २६६ ॥

[7]नाश्नाति सेवयोत्सृज्यादिनिद्रो न प्रबुध्यते ।
न निःशङ्कं वचो ब्रूते सेवकोऽप्यत्र जीवति ॥ २६७ ॥

---

१ Those alone are blessed, those alone are full of discrimination, and those alone are worthy of praise in this world, to whose houses friends repair on some business. विवेक जानंतीति. इत २ How can those who are servants fare well? ३ The wealth of those who are the servants of a king, is dependent on others, their mind is always uneasy and they have no confidence even about their own life (being safe). परायत्ता = परस्य आयत्ता. स त. ४ See what is done by those servants who wish to obtain wealth by service the fools have lost even the mastery over their own bodies (because they entirely depend upon their masters). हारितम P. P. of the caus. of ह lit caused to be taken away. ५ Firstly (तावत) birth itself causes great pain then there is always misery and in that again living is to be procured by service oh the series of calamities? दुर्गतता abstract noun from दुर्गत (miserable). दुर्गतस्य भावः. ६ These (the following five) though alive, are heard or said to be dead in the Bhárata, viz. he who is poor, he who is diseased, he who is foolish, he who is a traveller and he who is always a servant. For श्रूयन्ते किलभारते other editions read व्यासेन परिकीर्तिताः—declared by *Vyása*. ७ He who is a servant, cannot eat heartily by reason of his servitude, does not awake free from sleepiness, and does not speak anything without fear; but he only lives in this world. निनिद्र. व.

[1]सेवा श्ववृत्तिराख्याता तैस्तैर्मिथ्याः प्रजल्पितम् ।
स्वच्छन्दं चरति श्वात्र सेवकः परशासनात् ॥ २६८ ॥
[2]भूशय्या ब्रह्मचर्यं च कृशत्वं लघुभोजनम् ।
सेवकस्य यतेर्यद्वद्विशेषः पापधर्मजः ॥ २६९ ॥
[3]शीतातपादिकष्टानि सहते यानि सेवकः ।
धनाय तानि चाल्पानि यदि धर्मान्न मुच्यते ॥ २७० ॥
[4]मृदुनातिसुवृत्तेन सुमृष्टेनातिहारिणा ।
मोदकेनापि किं तेन निष्पत्तिर्यस्य सेवया ॥ २७१ ॥

संजीवक आह । अथ भवान्किं वक्तुमनाः । स आह । मित्र स्वामिनां सचिवानां मन्त्रभेदं कर्तुं न युज्यते । उक्तं च ।

[5]यो मन्त्रं स्वामिनो भिन्द्यात्सचिव्ये संनियोजितः ।
स हत्वा नृपकार्यं तन्मय्यं च नरकं व्रजेत् ॥ २७२ ॥

---

१ Those, who have said that service is like the life led by a dog, have made a false statement, (because) a dog acts according to his pleasure, while a servant acts under the orders of others श्ववृत्तिराख्याता = श्ववृत्तिरिति आख्याता. स्वच्छंदेन यथा तथा अत्र. २ The ground used as bed, celibacy of life, thinness and scanty food—these are common both to a servant and a hermit; but the only difference between the two is the one arising from sin and virtue (sin in the case of a servant and virtue in that of a hermit). भूशय्या—भूरेव शय्या. क. यद्वत similar. पापधर्मजः—पापधर्माभ्यां जातः. ३ The miseries arising from cold, heat and others, which a servant endures, have very little power to procure wealth even if he does not swerve from virtue ४ What is the use of that मोदक (a kind of sweetmeat) which is obtained from service, even though it be soft, very round, well cleaned and charming to look at. अतिहारिन् very attractive. ५ Construe स्वामिनां मंत्रभेदं कर्तुं सचिवानां न युज्यते. It is not proper on the part of ministers, to divulge the counsels of their lords. ६ He, who being appointed to the post of minister, will reveal the secret of his master, will destroy or ruin the king's affair which he divulges and himself will go to hell.

[1]येन यस्य कृतो भेदः सचिवेन महीपतेः ।
तेनाशस्त्रवधस्तस्य कृत इत्याह नारदः ॥ २७१ ॥

तथापि मया तव स्नेहपाशबद्धेन मन्त्रभेदः कार्यो यतस्त्वं मम वचनेनात्र गुजकुले विश्वस्तः प्रविष्टश्च । उक्तं च ।

[3]विश्रम्भायस्व यो मृत्युमवाप्नोति कथंचन ।
तस्य हत्या तदुत्था सा प्राहेदं वचनं मनुः ॥ २७४ ॥

तत्तवोपरि पिङ्गलकोयं दुष्टबुद्धिः कथंचिन्न चायानेन मत्पुरतश्चतुष्कर्णतया यत्प्रभाते संजीवकं हत्वा समस्तमृगपरिवारं चिरंजृम्भिं नेष्यामि । ततः स मयोक्तः । स्वामिन अयुक्तमिदं यन्मित्रद्रोहेण संजीवनं क्रियते । उक्तं च ।

[5]अपि ब्रह्मवधं कृत्वा प्रायश्चित्तेन शुध्यति ।
तदर्हेण विचीर्णेन न कथंचित्सुहृद्वधः ॥ २७५ ॥

ततस्तेनाहं सामर्षेणोक्तः । भो दुष्टबुद्धे संजीवकस्तावच्छष्पभोजी वयं मांसाशिनस्तदस्माकं स्वाभाविकं वैरमिति । कथं रिपुरुपेक्ष्यते । तस्मात्सामादिभिरुपायैर्हन्यते । न च हते तस्मिन्दोषः स्यात् । उक्तं च ।

---

१ That minister, who has betrayed his master's secrets, is said to have committed his murder without any weapon-so says Nārada. अशस्त्रवधः—नशस्त्रवधः. न. त. शस्त्रवेध. त. त. २ Bound to you by the ties of friendship ३ His murder arises from him, by placing confidence in whom he meets with death. This statement is made by Manu Construe यस्य विश्रंभात् यो मृत्युमवाप्नोति तस्य सा हत्या तदुत्थिता इति वचनं मनुः आह· तदुत्था = तस्मात् उत्था. पं. त. ४ In such a way as to be heard by four ears, that is, two persons only. ५ The retinue of the lion consisting of all the forest-animals. ६ Death or destruction. ७ Protection (रक्षणं) or it may be taken to mean feeding (भरणं) ८ Even if one commit the murder of a Brāhmana, he is freed from the sin thereof by undergoing an atonement (proportionately) adequate to the crime; but not from that of killing a friend. विचीर्णं P. P. of चर् 1 P. Irregularly formed. ९ Full of anger, indignant सामर्षेण—आमर्षेण सहितेन. व. १० Natural; inborn.

[1]दत्वापि कन्यकां वैरी [2]निहन्तव्यो विपश्चित् ।
अन्योपायैरशक्यो यो हते दोषो न विद्यते ॥ २७६ ॥
[3]कृत्याकृत्यं न मन्येत क्षत्रियो बुद्धिसंयुतः ।
सुप्तो वा द्रोणपुत्रेण धृष्टद्युम्नः पुरा हतः ॥ २७७ ॥

तदहं तस्य निश्चयं ज्ञात्वा त्वत्सकाशमुपागतः । साम्प्रतं मे नास्ति विश्वासघातकदोषः । [3]तथैव प्रतिभाति तत्कुरुष्वेति, । अथ संजीवकस्तद्वज्रपातदारुणं वचनं श्रुत्वा मोहमुपागतः । अथ चेतनां लब्ध्वा सवैराग्यमिदमाह । भोः साधिदमुच्यते ।

[4]दुर्जनगम्या नार्यः प्रायेणास्नेहवान्भवति राजा ।
कृपणानुसारि च धनं मेघो गिरिदुर्गवर्षी च ॥ २७८ ॥
[5]अहं हि संमतो राज्ञो य एवं मन्यते कुधीः ।
बलीवर्दः स विज्ञेयो विषाणपरिवर्जितः ॥ २७९ ॥
[6]वरं वनं वरं भैक्ष्यं वरं भारोपजीवनम् ।
वरं व्याधिमनुष्याणां नाधिकारेण संपदः ॥ २८० ॥

---

१ A wise man should kill his enemy even if he has given him (enemy) his own daughter in marriage; there is no sin in destroying him who is not likely to be won over by other remedies. २ A talented warrior should not think of what is fit or unfit to do; for example, formerly, Dhrishtadyumna while sleep was killed by the *son of Drona* (अश्वत्थामन्). ३ So that, you may now do what you think proper under the circumstances. ४ Disinterestedly. वैराग्येण सहितं यथा तथा. अ. ५ Women become accessible to the wicked, the king is generally destitute of affection, wealth follows a miser, and rain falls on difficult places in mountains. दुर्जनगम्या त. त. कृपणानुसारि-कृपणमनुसरतीति. उप. गिरिदुर्ग-गिरीणां दुर्गेषु वर्षति सः. उप. ६ That dull-headed fellow who thinks that he is a favourite of the king or is honoured by the king, should be considered to be a full-grown bull without horns. कुधीः-कुत्सिता धीः यस्य. ब. ७ It is better for men to resort to a forest, to beg, for livelihood, to subsist on carrying burden, or to have any disease, than to obtain wealth by holding an office (under a king). भारोपजीवनं-भारेण उपजीवनं. तृ. त.

तदयुक्तं मया कृतं यदनेन सह मैत्री विहिता । उक्तं च ।

[1]ययोरेव समं वित्तं ययोरेव समं कुलम ।
तयोर्मैत्री विवाहश्च न तु पुष्टविपुष्टयोः ॥ २८१ ॥

तथा च । [2]मृगा मृगैः सङ्गमनुव्रजन्ति
गावश्च गोभिस्तुरगास्तुरङ्गैः ।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः
समानशीलव्यसनेषु सख्यम ॥ २८२ ॥

तद्यदि गत्वा तं प्रसादयामि तथापि न प्रसादं यास्यति । उक्तं च ।

[3]निमित्तमुद्दिश्य हि यः प्रकुप्यति
ध्रुवं स तस्यापगमे प्रसीदति ।
अकारणद्वेषपरे हि यो भवे-
त्कथं नरस्तौ परितोषमेष्यति ॥ २८३ ॥

अहो साधु चेदमुच्यते ।

[4]भक्तानामुपकारिणां परहितव्यापारयुक्तात्मनां

---

१ Friendship and alliance by marriage are proper only between those who are equal in point of wealth as well as birth, and not between those who are strong and those who are weak. For समं कुलं there is a different reading as समे बले which gives a better sense than कुलं. २ Deer associate with deer, cows with cows, horses with horses, fools with fools, wise men with wise men, there is friendship between those whose dispositions are similar and those whose misfortunes are equal. समाने शीलव्यसने येषां तेषु ब. ३ He, who gets angry from a particular cause, is surely pacified when that cause is removed; but how will he, who entertains hatred without any cause, be propitiated ? अकारणात् द्वेषपरः = अकारणद्वेषपरः . द्वेषः परे यस्य सः द्वेषपरः. ब. ४ Misfortune is certain in the various failings even of those servants who are devoted, obliging and have their minds always directed towards accomplishing the good of others, who know the essence of the duties of servitude and who are free from treachery, while as regards success it may be obtained or may not be obtained; therefore, the service of kings like that of the ocean, is always attended with uncertainty or danger, *i.e*, as one is not sure to succeed in his maritime enterprise, so he is with respect to a king. परहितस्य व्यापारे युक्ता आत्मानः येषां ते. ब.

सेवासंव्यवहारतत्त्वविदुषां द्रोहच्युतानामपि ।
व्यापत्तिः स्खलितान्तरेषु नियता सिद्धिर्भवेद्वा न वा
तस्माद्भ्रुवपतेर्गिरावनिपतेः सेवा सदाशङ्किनी ॥ २८४ ॥

तथा च । [1]भावस्निग्धैरुपकृतमपि द्वेष्यतां याति किंचि-[2]
च्छाठ्यादन्यैरपकृतमपि प्रीतये चोपयाति ।
दुर्ग्राह्यत्वान्नृपतिमनसां नैकभावाश्रयाणां
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ २८५ ॥

तत्परिज्ञातं मया यत्प्रसादमहमानैः समीपवर्तिभिरेष पिङ्गलकः प्रकोपितः । तेनायं ममादोषस्यापीवं वदति । उक्तं च ।

[3]प्रभोः प्रसादमन्यस्य न सहन्तीह सेवकाः ।
सपत्न्य इव संक्रुद्धाः सपत्न्याः स्वाकृतेरपि ॥ २८६ ॥

भवति चैवं यद्गुणवता [4]समीपवर्तिना तद्गुणैरन्येषां प्रसादो न भवति । उक्तं च ।

[5]गुणवत्तरपात्रेण च्छाद्यन्ते गुणिनां गुणाः ।
रात्रौ दीपशिखाकान्तिर्न भानावुदिते सति ॥ २८७ ॥

---

१ Even the obligations conferred by those who are heartily attached, are looked upon as hateful; while the little injury that is done by others deceitfully, becomes pleasing; on account of the unfathomable depth of the minds of kings which are filled with various feelings, the duty of servitude is very hard and impracticable even to saints. भावस्निग्ध. न. त. दुर्ग्राह्यत्व the quality of fathoming with difficulty. नैक...णां adj. of ;,नसां. न एकभावाना आश्रयाणाम् ब. २ The favour shown (to me.) ३ Although I am free from blame. अदोष —नास्ति दोषः यस्य सः. ब. ४ Servants of kings cannot bear to see favour shown to any other person, as fellow-wives get angry with one of their own, though of a very charming form. स्वाकृतेः— शोभना आकृति यस्याः सा स्वाकृतिः तस्याः. ब. ५ When a qualified person is near. ६ The virtues of the virtuous are thrown into the shade by one superior to them in virtue; the flame of a lamp has lustre at night and not after the sun has risen. गुणवत्तरपात्रम्means one who is a receptacle of better qualities.

दमनक आह। भो मित्र यथेदं तथास्ति ते भयम्। प्रकोपितोऽपि स दुर्जनैस्तव वचनेन प्रसादं[2] यास्यति। संजीवक आह। भो न युक्तमुक्तं भवता। लघूनामपि दुर्जनानां मध्ये वस्तुं न शक्यते। उपायान्तरं विधाय ते नूनं घ्नन्ति। उक्तं च।

[3]बहवः पण्डिताः क्षुद्राः सर्वे मायोपजीविनः।
कुर्युः कृत्यमकृत्यं वा उष्ट्रे काकादयो यथा ॥ २८८ ॥

दमनक आह। कथमेतत्। सोऽब्रवीत्।

॥ कथा ११ ॥

अस्ति कस्मिंश्चिद्वनोद्देशे मदोत्कटो नाम सिंहः प्रतिवसति स्म। तस्य चानुचरा अन्ये द्वीपिवायसगोमायवः सन्ति। अथ कदाचित्तैरितस्ततो भ्रमद्भिः सार्थाद्भ्रष्टः कथनको नामोष्ट्रो दृष्टः। अथ सिंह आह। अहो अपूर्वमिदं सत्त्वम। तज्ज्ञायतां किमेतदरण्यकं ग्राम्यं वेति। तच्छ्रुत्वा वायस आह। भोः स्वामिन्ग्राम्योयमुष्ट्रनामा जीवविशेषस्तव भोज्यः। तद्व्यापाद्यताम्। सिंह आह। नाहं गृहमागतं हन्मि। उक्तं च।

[10]गृहं शत्रुमपि प्राप्तं विश्वस्तमकुतोभयम्।
यो हन्यात्तस्य पापं स्याच्छतब्राह्मणघातजम ॥ २८९ ॥

---

१ Will be pacified. २ A remedy other than strength. अन्य उपाय . क. ३ Many are the insignificant wise people, all living by trick or deceit, and they will do any thing whether fit to do or unfit, just as the crow and others acted towards the camel (in the following story.). मायोपजीविन —मायया उपजीवन्ति इति. उप. ४ अस्ति &c. प्रतिवसति स्म. Here अस्ति is superfluous as a verb showing existence. It, therefore, should be taken to mean something like "there", "they say that" &c. in English. ५ A jackal. ६ Fallen away from the herd. ७ Whether it is a wild animal or a domestic one. ८ A particular kind of creature or animal. ९ Fit to be devoured by you ; a prey for you. १० He, who kills even his enemy who is come to his house, who has confided in him and who is, therefore, free from fear, will be guilty of sin amounting to that arising from the murder of a hundred Brahmans. अकुतोभयम्=नास्ति कुतोपि भियं यस्य. ब. व्र. . तत्राह्मणानां घाताज्जातम्. पं. त.

तदभयप्रदानं[2] दत्त्वा मत्सकाशमानीयतां येनास्यागमकारणं पृच्छामि । अथासौ सर्वैरपि विश्वास्याभयप्रदानं दत्त्वा मदोत्कटसकाशमानीतः प्रणम्योपविष्टश्च । ततस्तस्य[3] पृच्छतस्तेनात्मवृत्तान्तः सार्थभ्रंशसमुद्भवो निवेदितः । ततः सिंहेनोक्तम् । भोः कथनक मा त्वं ग्रामं गत्वा भूयोपि भारोद्वहनैकदुःखभागी भूयाः[4]। तदत्रारण्ये निर्विशङ्को मरकतसदृशानि शष्पाग्राणि भक्षयन्मया सह सदैव वस । सोपि तथेत्युक्त्वा तेषां मध्ये विचरन्न कुतोपि[5] भयमिति सुखेनास्ते । तथान्येयुर्मदोत्कटस्य महागजेनारण्यचौरिणा[6] सह युद्धमभवत् । ततस्तस्य दन्तमुसलप्रहारैर्व्यर्थाः संजाताः । व्यथितः कथमपि प्राणैर्न वियुक्तः । अथ शरीरग्लानिमशक्त्या कुत्रचित्पदमपि चलितुं शक्नोति । ते सर्वे काकादयोप्यप्रभुत्वेन[7] क्षुधाविष्टाः परं दुःखं भेजुः । अथ तान्सिंहः प्राह । भो अन्विष्यतां कुत्रचिन्किंचिन्मन्त्रं येनाहमनेनापि[8] दशां प्राप्तस्तद्धत्वा युष्मद्भोजनं संपादयामि । अथ ते चत्वारोपि भ्रमितुमारब्धा यावन्न किंचिन्मन्त्रं पश्यन्ति तावद्वायसशृगालौ परस्परं मन्त्रयतः । शृगाल आह । भो वायस किं प्रभूतभ्रान्तेन[9] । अयमस्माकं प्रभोः कथनको विश्वस्तिष्ठति । तदेनं हत्वा प्राणयात्रां कुर्मः । वायस आह । युक्तमुक्तं भवता परं स्वामिना तस्याभयप्रदानं दत्तमास्ते न वध्योय-

---

१ Being given a promise of safety. २ Being made to confide. ३ Him who was asking. ४ Proceeding from the separation from the herd, that is, about his being separated &c. ५ Enduring the hardship of carrying loads. भारोद्वहनकष्टं भजते इति भारोद्वहनकष्टभागिन्. ६ Free from fear or danger. ७ Resembling emerald, as green as emerald &c. ८ The sprouts of grass. ९ Thinking he had no fear of any body. १० Living in the forest. ११ With the strokes of his pestle—like tusks. दन्त एव मुसल. क. १२ With great difficulty. १३ Through the inability of the body. १४ For want of chief power. १५ Though reduced to this state. १६ What is the use of wandering too much? १७ Trusted, confidential.

ति। शृगालः आह। भो वायस अहं स्वामिनं विज्ञाप्य तथा करिष्ये यथा स्वामी वधं करिष्यति। तत्तिष्ठन्तु भवन्तोऽत्रैव यावदहं गृहं गत्वा प्रभोरनुज्ञां गृहीत्वा चागच्छामि। एवमभिधाय सत्वरं सिंहमुपस्थितवान्। अथ सिंहमामायेदमाह। स्वामिन्समस्तं वनं भ्रान्त्वा वयमागताः। न किंचिदन्नमासादितम्। तत्किं कुर्मो वयम्। संप्रति वयं बुभुक्षया पदमपि चलितुं न शक्नुमः। देवोऽपि पथ्याशी वर्तते। तद्यदि देवादेशो भवति तत्कथनकृपिशितेनात्म पथ्यक्रिया क्रियते। अथ सिंहस्तस्य तद्वारुणं वचनमाकर्ण्य सकोपमिदमाह। धिक्पापाधम यत्रैवं भूयोऽपि वदसि ततस्त्वां तत्क्षणेन वधिष्यामि यतो मया तस्याभयं दत्तम्। तत्कथं व्यापादयामि। उक्तं च।

न गोप्रदानं न महीप्रदानं
न चान्नदानं हि तथा प्रदानम्।
यथा वदन्तीह बुधाः प्रधानं
सर्वप्रदानेष्वभयप्रदानम् ॥ २९० ॥

तच्छ्रुत्वा शृगाल आह। स्वामिन्यदभयप्रदानं दत्त्वा वधः क्रियते तदेष दोषो भवति। पुनर्यदि देवपादानां भक्त्या स आत्मनो जीवितव्यं प्रयच्छति तन्न दोषः। ततो यदि स स्वयमेवात्मानं वधाय नियोजयति तद्वध्यान्यथाऽस्माकं मध्यादेकतमो वध्य इति यतो देवपादाः पथ्याशिनः क्षुन्निरोधादन्यादृशीं दशां यास्यन्ति। तत्किमेतैः प्राणैरस्माकं ये स्वाम्यर्थे न यास्यन्ति। अपरं पश्चादप्यस्माभिर्विप्रवेशः कार्यो यदि स्वामिपादानां किंचिदनिष्टं भविष्यति। उक्तं च।

---

१ Shall act in such a way that &c. २ One who requires wholesome food पथ्यमश्नातीति. ३ Flesh. ४ The wise do not attach so much importance to the giving away of a cow, land, food and charity in general as they do to the promise of safety considering it as the chief of all gifts. ५ By reason of his devotion to your majesty. ६ Offers himself up as a victim. ७ Through the non-gratification of hunger, by checking hunger. ८ The last extremity. ९ What is the use of these our lives if they are not given up for our lord? १० Entering the fire by way of suicide. ११ Any mishap—death.

[1]यस्मिन्कुले यः पुरुषः प्रधानः
स सर्वयत्नैः परिरक्षणीयः ।
तस्मिन्विनष्टे स्वकुलं विनष्टं
न नाभिभङ्गे ह्यरका वहन्ति ॥ २९१ ॥

तदाकर्ण्य मदोत्कट आह । ययेवं तत्कुरुत्व यद्रोचते । तच्छ्रुत्वा स सत्वरं गत्वा तानाह । भोः स्वामिनो महत्यवस्था[2] वर्तते तत्किं पर्यटितेन । तेन विना कोत्रास्मान्रक्षयिष्यति । तद्गत्वा तस्य क्षुद्बाधा[3]त्परलोकं प्रस्थितस्यान्मशरीरदानं कुर्मो येन स्वामिप्रसादस्यानृणतां[4] गच्छामः । उक्तं च ।

आपदं प्राप्नुयात्स्वामी यस्य भृत्यस्य जीवतः ।
प्राणेषु वियमानेषु स भृत्यो नरकं व्रजेत् ॥ २९२ ॥

इति श्रुत्वा ते सर्वे बाष्पपूरितदृशो[5] मदोत्कटं प्रणम्योपविष्टाः । तान्दृष्ट्वा मदोत्कट आह । भोः प्राप्तं दृष्टं वा किंचित्सत्त्वम् । अथ तेषां मध्यात्काकः प्रोवाच । स्वामिन्वयं तावत्सर्वत्र पर्यटिताः परं न किंचित्सत्त्वमासादितं दृष्टं वा । तदय मां भक्षयित्वा प्राणान्धारयतु स्वामी येन देवस्यार्थायना[6] भवति मम पुनः स्वर्गप्राप्तिरिति । उक्तं च ।

[7]स्वाम्यर्थे यस्त्यजेत्प्राणान्भृत्यो भक्तिसमन्वितः ।
स परं पदमाप्नोति जरामरणवर्जितम्[8] ॥ २९३ ॥

---

१ That man, who is the chief of a family, should be saved with all efforts; if he perish, his whole family perishes, for when the nave of a wheel is broken, the spokes do not move. २ Our lord is in a serious condition, his condition is very precarious (महती lit. great, serious). ३ Who is about to depart to the next world through hunger. ४ Freedom from debt. ५ That servant will go to hell who being alive, the master will meet with calamities ६ With eyes filled with tears. ७ Support. ८ Satisfaction. ९ That servant, who being full of devotion, gives up his life for the sake of his master, obtains a very high position free from oldage and death. परं = परम्+जरामरणाभ्यां वर्जितं. तु. त.

तच्छ्रुत्वा शृगाल आह । भोः स्वल्पकायो भवान् । भवद्भक्षणा-स्वामिनस्तावत्प्राणयात्रा न भवत्यपरो दोषश्च तावत्समुत्पद्यते । उक्तं च ।

[1]काकमांसं शुनोच्छिष्टं स्वल्पं तदपि दुर्बलम् ।
भक्षितेनापि किं तेन तृप्तिर्येन न जायते ॥ २९४ ॥

तद्दर्शिता स्वामिभक्तिर्भवता गतं चानृण्यं[2] भर्तृपिण्डस्य प्राप्तश्चोभयलोके साधुवादः[3] । तदप्यगत्यतः । अहं स्वामिनं विज्ञापयामि । तथानुष्ठिते शृगालः सादरं प्रणम्योपविष्टः । स्वामिन्मां भक्षयित्वाथ प्राणयात्रां विधाय ममोभयलोकप्रीतिं कुरु । उक्तं च ।

[4]स्वाम्यायत्ताः सदा प्राणा भृत्यानामर्जिता धनैः ।
यतस्तेषां न दोषोऽस्ति तेषां ग्रहणसंभवः ॥ २९५ ॥

अथ तच्छ्रुत्वा द्वीप्याह । भोः साधुकं भवता पुनर्भवानपि स्वल्पकायः स्वजातिश्च नखायुधान्वादभक्ष्य एव । उक्तं च ।

[5]नाभक्ष्यं भक्षयेत्प्राज्ञः प्राणैः कण्ठगतैरपि ।
विशेषात्तदपि स्तोकं लोकद्वयविनाशकम ॥ २९६ ॥

---

१ The flesh of a crow as also the remains of a dog's food are small and those again of little strength; what is the use even if one eat them since no satisfaction is produced from them. २ You have thus paid the debt which you owed to your master for support &c. ३ Praises, commendation. ४ Thus give me both the worlds (this and the next). ५ The lives of servants which are, as it were, earned with the master's wealth, are solely at the master's service, and so there is no blame attached to one if they (lives) are taken. [illegible]नमभव — ग्रहणात् संभवः [illegible] प. व. ६ By reason of your being furnished with nails for weapons. नखमेवायुधं यस्य स तस्य भावः ब. नखायुधत्वं. ७ A wise man should not eat what is unfit to eat even if he be at the point of death; even if that be little, it particularly destroys both the worlds, that is, one's happiness here as well as in heaven.

तद्दर्शितं त्वयात्मनः कौलीन्यम् । अथवा साधु चेदमुच्यते ।

[1]एतदर्थं कुलीनानां नृपाः कुर्वन्ति संग्रहम् ।
आदिमध्यावसानेषु न ते गच्छन्ति विक्रियाम् ॥ २९७ ॥

तदपसर्पतो येनाहं स्वामिनं विज्ञापयामि । तथानुष्ठिते द्वीपी प्रणम्य मदोत्कटमाह । स्वामिन्किंकरतामय मम प्राणैः प्राणयात्रा दीयतामक्षयोवासः स्वर्गे मम विस्तार्यतां क्षितितले प्रभूतं यश इति तत्रात्र विस्मयः कार्यः । उक्तं च ।

[3]मृतानां स्वामिनः कार्ये भृत्यानामनुवर्तिनाम् ।
भवेत्स्वर्गेक्षयो वासः कीर्तिश्च धरणीतले ॥ २९८ ॥

तच्छ्रुत्वा कथनकश्चिन्तयामास । एतैस्तावन्मर्मवेधिभिः शोभावाक्यान्युक्तानि न चैकोपि स्वामिना विनाशितः । तदहमपि प्राप्तकालं वक्ष्यामि चित्रकं येन मद्वचनमेते त्रयोपि समर्थयन्ति । इति निश्चित्य प्रोवाच । भोः सत्यमुक्तं भवता परं भवानपि नखायुधः । तत्कथं भवन्तं स्वामी भक्षयति । उक्तं च ।

[6]मनसापि स्वजात्यानां योनिष्टानि प्रचिन्तयेत ।
भवन्ति तस्य तान्येव इह लोके परत्र च ॥ २९९ ॥

तदपसर्पतो येनाहं स्वामिनं विज्ञापयामि । तथानुष्ठिते कथनकोपि स्थित्वा प्रणम्योवाच । स्वामिन एतेभ्यस्तव तन्मम प्राणैः प्राणयात्रा विधीयतां येन ममोभयलोकयोर्हितं भवति । उक्तं च ।

---

१ It is for this reason that the kings keep around them noble persons, for they do not change at the beginning, in the middle and end, that is, they always remain what they are. आदि...पु-द्वंद. २ Eternal, everlasting. ३ Those servants, who die for the sake of their masters and who are obedient, will live forever in heaven and their fame will remain on earth ४ Speeches of beauty, *i. e*, beautiful or complimentary words. ५ What befits the occasion. प्राप्त काल यस्य तत्. ब. ६ A tiger or leopard. ७ To consider, to believe. ८ These very evils which a man thinks of doing to his castemen, befall him both in this as well as the next world.

[1]न यज्वानोऽपि गच्छन्ति यां गतिं नैव योगिनः ।
यां यान्ति प्रोज्झितप्राणाः स्वाम्यर्थे सेवकोत्तमाः ॥ ३०० ॥

एवमभिहिते ताभ्यां शृगालाचित्रकाभ्यां विदारितोभयकुक्षिः कथनकः प्राणान्त्यक्षीत्[2]। ततश्च तैः क्षुद्रपण्डितैः सर्वैर्भक्षितः ॥

अतोहं ब्रवीमि बहवः पण्डिताः क्षुद्रा इति ।
तद्भद्र क्षुद्रपरिवारोयं राजा मया संपरिकल्पितः । उक्तं च ।

[3]अशुद्धप्रकृतौ राज्ञि जनता नानुरज्यते ।
यथा गृध्रसमामत्रः कलहंसः समाचरेत ॥ ३०१ ॥

तथा च । [4]गृध्राकारोऽपि सेव्यः स्याद्धंसाकारैः सभासदैः ।
हंसाकारोऽपि संत्याज्यो गृध्राकारैः स तैर्नृपः ॥ ३०२ ॥

तन्नूनं ममोपरि केनचिद्दुर्जनेनायं प्रकोपितः । तेनैवं वदति ।
अथवा भवत्येतत् । उक्तं च ।

[5]कर्णविषेण च भग्नः किं किं न करोति बालिशो लोकः ।
क्षपणकतामपि धत्ते पिबति सुरां नरकपालेन ॥ ३०३ ॥

अथवा साध्विदमुच्यते ।

---

१ Neither sacrificers nor ascetics attain to that dignity, which excellent servants do (attain) by sacrificing their lives for the sake of their masters. प्रोज्झितप्राणा ब. २ Having both the sides torn open. विदारिते उभयकुक्षी यस्य. ब. ३ Known or found out. ४ The subjects or people do not become attached to a king whose ministers are dishonest or foul; and he will act like a gander overtaken by a vulture. अशुद्धप्रकृतौ-अशुद्धा प्रकृतिर्यस्य स. ब. ५ Even though a king be of the nature of vultures, he is fit to be served when he has councillors of the nature of swans; while when he is of the nature of swans, he should be abandoned by reason of his having councillors of the nature of vultures. गृध्राकार-गृध्रस्येव आकारः यस्य स. ब. ६ When spoiled by the poison of the ear what thing will a foolish person not do? He will accept asceticism and drink wine in a pot of the skull of human beings.

[1] पादाहतोपि दृढदण्डसमाहतोपि
यं दंशया स्पृशति तं किल हन्ति सर्पः ।
कोप्येष एव हि पिशुनोग्रमनुष्यधर्मः
कर्णे परं स्पृशति हन्ति परं समूलम् ॥ ३०४ ॥

तथा च । [2] अहो खलभुजङ्गस्य विपरीतवधक्रमः ।
कर्णे लगति चान्यस्य प्राणैरन्यो वियुज्यते ॥ ३०५ ॥

तदेवं गतेपि किं कर्तव्यमिति । अहं त्वां सुहृद्भावात्पृच्छामि । दमनक आह । तद्दशान्तरगमनं युज्यते नैवंविधस्य कुस्वामिनः सेवां विधातुम् । उक्तं च ।

[3] गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥ ३०६ ॥

संजीवक आह । अन्येनतरं स्वामिनि कुपिते गन्तुं न शक्यते न चान्यत्र गतानामपि निर्वृतिर्भवति । उक्तं च ।

[4] महतां योपराध्येत दूरस्थोस्मीति नाश्वसेत् ।
दीर्घौ बुद्धिमतो बाहू स ताभ्यां हन्ति हिंसितः ॥ ३०७ ॥

---

१ It is a fact that a snake, even though struck with the foot and beaten with a strong stick, kills him alone whom he *touches with his teeth* (bites); while very strange (indescribable) is this action of a terrible slanderer in the shape of a human being, because he touches the ear of one man and kills another entirely, *i. e.*, he whispers something in the ears of one person and destroys another. पादहत and दृढ are both त. तिशुन एव इस मनुष्य पिशुनोग्रमनुष्य. क तस्य धर्म -प. त. २ Very strange or extraordinary is the mode of killing of a serpent in the shape of a wicked person; because he whispers something in the ear of one man, while another dies. खलभुजग-खलभुजेग इत्य. क. For विपरीत other editions read विचित्र. ३ Through friendship, as a friend. ४ A bad master. ५ Abandonment is ordained even of a preceptor who is elated with pride, does not know what is fit or unfit to do and goes astray. ६ He, who offends the great, should not take comfort in the fact that, he is far away from them; for the arms of a talented person are long and he strikes with them when injured.

तद्युद्धं मुक्त्वा मे नास्त्यन्यच्छ्रेयस्करम् । उक्तं च ।

[3]न तान्सुतीर्थैस्तपसा च लोका-
स्स्वर्गार्पिणां दानशतैः सुविज्ञैः ।
क्षणेन यान्याान्ति रणेषु धीराः
प्राणान्समुज्झन्ति हि ये सुशीलाः ॥ ३०८ ॥

[4]मृतैः संप्राप्यते स्वर्गो जीवद्भिः कीर्तिरुत्तमा ।
तदुभावपि शूराणां गुणावेतौ न दुर्लभौ ॥ ३०९ ॥

तथा च । [5]होमार्थविविधपदानविधिना सद्विप्रवृन्दार्चनै-
र्यज्ञैर्भूरिसुदक्षिणैः सुविहितैः संप्राप्यते यत्फलम् ।
सत्तीर्थाश्रमवासहोमनियमैश्चान्द्रायणाद्यैः क्रतैः
पुम्भिस्तत्फलमाहवे विनिहतैः संप्राप्यते तत्क्षणात् ॥ ३१० ॥

तदाकर्ण्य दमनकश्चिन्तयामास । तयुद्धाय क्रतनिश्चयोयं दृश्यते दुरात्मा । तयदि कदाचिन्नीक्षणशृङ्गाभ्यां स्वामिनं प्रहरिष्यति तन्महाननर्थः संपत्स्यते । [6]तदेनं भृयोपि स्वबुद्ध्या प्रबोध्य तथा करोमि यथा देशान्तरगमनं करोति । आह च । भो मित्र सम्यगभिहितं भवता परं किंतु कः स्वामिभृत्ययोः संग्रामः । उक्तं च ।

---

[1] Without. [2] Beneficial. [3] Those worlds which, those bold persons who lose their lives in battle, obtain in a moment, are not obtained by those desirous of going to heaven even by means of good holy places, penance, by hundreds of charitable acts and by wealth. [4] By dying heaven is obtained and by living excellent fame is secured, so both these advantages (गुणौ) are not difficult to be obtained by the brave, that is, they can easily obtain them. [5] Those persons, who are killed in battle, immediately obtain that fruit which is obtained by oblations to fire accompanied with various kinds of presents, by worshipping multitudes of good Brâhmans, by sacrifices in which much wealth is bestowed as Dakshina and also by residence in a holy place, oblations to fire, vows and Chândrâyana vow. [6] Having advised him, having awakened him to the reality of his position. [7] What battle is there between a lord and his servant, that is, the fight would be unequal.

[1]बलवन्तं रिपुं दृष्ट्वा [2]किलात्मानं प्रगोपयेत् ।
बलवद्भिश्च कर्तव्या शरच्चन्द्रप्रकाशता ॥ ३११ ।

अन्यच्च । [3]शत्रोर्बलमविज्ञाय वैरमारभते तु यः ।
स पराभवमाप्नोति समुद्रष्टिट्टिभादिव ॥ ३१२ ॥

संजीवक आह । कथमेतत् । सोऽब्रवीत् ।

॥ कथा १२ ॥

कस्मिंश्चित्समुद्रैकदेशे टिट्टिभदंपती वसतः । ततो गच्छति काले ऋतुसमयमासाद्य टिट्टिभी गर्भमाधत्त । आसन्नप्रसवा सती टिट्टिभमूचे । भोः कान्त मम प्रसवसमयो वर्तते तद्विचिन्त्यतां किमपि निरुपद्रवं स्थानं येन तत्राहमण्डकमोक्षणं करोमि । टिट्टिभ आह । भद्रे रम्योयं समुद्रप्रदेशः । तदत्रैव प्रसवः कार्यः । सा प्राह । अत्र पूर्णिमादिने समुद्रवेला [4]चटति । सा मत्तगजेन्द्रानप्याकर्षति । तद्दूरमन्यत्र किंचित्स्थानमन्विष्यताम् । तच्छ्रुत्वा विहस्य टिट्टिभ आह । भद्रे न युक्तमुक्तं भवत्या । का मात्रा समुद्रस्य यो मम [5]दृषयिष्यति प्रमूनिम् । तद्विश्रब्धात्रैव गर्भं मुञ्च । उक्तं च ।

---

१ Having seen a powerful enemy one, should protect himself or hide himself from him; while those who are powerful should assume the brilliancy of the moon in the *Sarat season* (the bright light of the moon in आश्विन and कार्तिक is well known) शरच्चन्द्रप्रकाशता—शरच्चन्द्रप्रकाशस्य भावः. २ He, who commences hostilities without ascertaining the strength of the enemy meets with a defeat, as the sea *sustained a defeat* at the hands of a टिट्टिभ (a lapwing). ३ In one part of the sea. ४ A couple, a pair. This word is made up of जाया and पति. ५ The time favourable for conception. ६ Had conception, conceived. ७ Near her delivery, about to be confined. आसन्नः प्रसवः यस्याः सा. ८ The laying of eggs. ९ The tide of the sea comes up or reaches. १० Hurt, injure. ११ Free from fear, confident.

[1]यः पराभवसंग्रामः स्वस्थानैं संत्यजेन्नरः ।
तेन चैत्पुत्रिणी माता तद्वन्ध्या केन कथ्यते ॥ ३१३ ॥

तच्छ्रुत्वा [2]समुद्रश्चिन्तयामास । [3]अहो गर्वः पक्षिकीटस्यास्य । अथवा साध्विदमुच्यते ।

[4]उत्क्षिप्य टिट्टिभः पादावास्ते भङ्गभयाद्दिवः ।
स्वचित्तकल्पितो गर्वः कस्य नात्रापि वियते ॥ ३१४ ॥

[5]तन्मयास्य प्रमाणं कुतूहलादपि द्रष्टव्यम । किं ममैषोऽण्डापहारे कृते करिष्यति । इति चिन्तयित्वा स्थितः । अथ प्रभवानन्तरं प्राणयात्रार्थं गतायाष्टिट्टिभ्याः समुद्रो वेलाव्याजेनाण्डान्यपजहार । अथायाता सा टिट्टिभी प्रभवस्थानं शून्यमवलोक्य प्रलपन्ती टिट्टिभमूचे । भो मूर्ख कथितमस्माभिस्तव यत्समुद्रवेलयाण्डानां विनाशो भविष्यति तदृजुकं व्रजावः परं मूढतयाहंकारमाश्रित्य मम वचनं न करोषि । अथवा साध्विदमुच्यते ।

[6]सुहृदां हितकामानां न करोतीह यो वचः ।
स कूर्म इव दुर्बुद्धिः काष्ठाद्भ्रष्टो विनश्यति ॥ ३१५ ॥

टिट्टिभ आह । कथमेतत् । सान्ब्रवीत् ।

---

१ If a mother is to be called पुत्रिणी (a woman having a son) by having that son, who (being defeated abandons his own place, for what son should she be called barren ? that is, she is a barren whose son &c. २ Oh ! how great is the pride of this miserable bird ! The word कीट at the end of compounds has the sense of contempt. पक्षी एव कीटः. क. ३ The *tittibha* bird lies down with its legs upwards (throwing its legs up) through the fear of the breaking of the sky (to support it); who has no pride conceived in his own mind ? This verse is found written as under :—स्वचित्तकल्पितो गर्वः कस्य नाम न वियते । उत्क्षिप्य टिट्टिभी पादौ शेते भङ्गभयादिवः ॥ स्वचित्तकल्पित स. त. ४ Let me then see the truth of this out of curiosity at least (if for nothing else). ५ Under the pretext of tide. ६ Having recourse to pride or egotism. ७ He, who does not listen to the advice of friends who are desirous of doing him good, perishes like a foolish tortoise falling down from a piece of wood. And hint. व.

॥ कथा १३ ॥

अस्ति कस्मिंश्चिज्जलाशये कम्बुग्रीवो नाम कच्छपः । तस्य संकटविकटनाम्नी मित्रे हंसजातीये परमस्नेहमाश्रिते । तौ च हंसौ सरस्तीरमासाद्य तेन सहानेकदेवर्षिमहर्षीणां कथाः कृत्वास्वंमनवेलायां स्वनीडसंश्रयं कुरुतः । अथ गच्छति कालेनावृष्टिवशात्सरः शनैः शनैः शोषमगमत् । ततस्तद्दुःखदुःखितौ तावूचतुः । भो मित्र जम्बालशेषमेतत्सरः संजातं तत्कथं भवान्भविष्यतीति व्याकुलत्वं नो हृदि वर्तते । तच्छ्रुत्वा कम्बुग्रीव आह । भोः सांप्रतं नास्त्यस्माकं जीवितव्यं जलाभावात् । तथाप्युपायश्चिन्त्यताभिति । उक्तं च ।

त्याज्यं न धैर्यं विधुरेऽपि काले
धैर्यात्कदाचिद्गतिमाप्नुयात्सः ।
यथा समुद्रेऽपि च पोतभङ्गे
सांयात्रिको वाञ्छति तर्तुमेव ॥ ३१६ ॥

अपरं च ।

मित्रार्थे बान्धवार्थे च बुद्धिमान्यतते सदा ।
जातास्वापत्सु यत्नेन जगादेदं बचो मनुः ॥ ३१७ ॥

तदानीयतां काचिद्दीर्घरज्जुर्लघु काष्ठं वाञ्छिष्यतां च प्रभूतजलं-

---

१ Of the swan-kind. २ Resorted to or went to their nests for shelter (during night). ३ Grieved at his grief. तस्य (कच्छपस्य) दुःखेन दुःखितौ. ४ Having only the mud remaining. जम्बाल एव शेषः यस्य. ब. ५ How will it fare with you? what will be your state? ६ Anxiety, perplexity. ७ It is not possible for us to live. ८ Even though the times be adverse, one should not give up courage; perhaps through courage one (सः) may obtain success (गति); just as in the sea when a boat is broken, a voyaging merchant wishes only to cross in safety. तर्तुम्=तरीतुं or तरितुं being a set root. ९ A talented man always strives with efforts for the sake of a friend or relative when calamities befall, so says Manu. १० Full of plentiful water.

[illegible]र्थं अगे येन मया मध्यप्रदेशे दन्तैर्गृह्यते सति युवां कोटिभागयो-
[illegible]हं मया सहितं संगृह्य तत्सगे नयथैः । तावूचतुः । भो मित्र
[illegible]करिष्यावः परं भवता मौनव्रतेन भाव्यं नो चेत्तव काष्ठात्पातो
[illegible]मति । तथानुष्ठिते गच्छता कम्बुग्रीवेणाधोभागव्यवस्थितं किं-
[illegible]पुरुषमालोकितम् । तच्च ये पौरास्ते तथा नीयमानं विलोक्य सवि-
स्मयमिदमूचुः । अहो चक्राकारं किमपि पक्षिभ्यां नीयते । पश्यत
पश्यत । अथ तैर्यो कोलाहलमाकर्ण्य कम्बुग्रीव आहै । भोः किमेष
कोलाहल इति वक्तुमना अधैर्कि[illegible]पतिः पौरैः खण्डशः कृतश्च ।
अतोहं ब्रवीमि सुहृदां हितकामानामिति ॥

तथा च । [12]अनागतविधाता च प्रत्युत्पन्नमतिस्तथा ।
द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति ॥ ३१८ ॥

टिट्टिभ आह । कथमेतत् । माश्रवीत् ।

॥ कथा १४ ॥

कस्मिंश्चिज्जलाशयेनागतविधाता प्रत्युत्पन्नमतिर्यद्भविष्यश्चेति त्र-
यो मत्स्याः सन्ति । अथ कदाचिन्नं जलाशयं दृष्ट्वागच्छद्भिर्मत्स्यै-
र्जीविभिरुक्तं यदहो बहुमत्स्योयं ह्रदः कदाचिदपि नास्माभिरत्रे-

---

२ The middle portion (of the stick) being seized with the teeth. ३ At the two ends. ४ The Present is used for the Future. नयथ =नयथः. ५ One who has taken upon himself the vow of silence. मौनं व्रतं यस्य. ब. ६ By Kambugriva who was going or rather being carried by the two swans. ७ Situated, lying. ८ Having the form of a wheel, something like a wheel. ९ Noise, uproar. १० Wished or began to say. ११ Desirous of saying The words मनस् or काम are affixed to the infinitives of verbs after dropping the nasal in the sense of "*desirous of*" &c. १२ Being half uttered. १३ अनागतविधाता (he who provides for what is not come, that is, provident) and प्रत्युत्पन्नमति (he who is ready-witted)—these two happily prosper, while यद्भविष्य (he who says what is to happen will happen, that is, a fatalist) perishes. अनागतविधाता=अनागतस्य विधाता. ष. त. प्रत्युत्पन्नमतिः-प्रत्युत्पन्ना मतिर्यस्य. ब. १३ Fishermen. १४ A pond, a lake.

षितः । तदाहारवृत्तिः संजाता संध्यासमयश्च संभूतस्ततः प्रभाते आगन्तव्यमिति निश्चयः । अतस्तेषां तत्कुलिशपातोपमं वचः समाकर्ण्यानागतविधाता सर्वान्मित्स्यानाहूयेदमूचे । अहो श्रुतं भवद्भिर्यन्मत्स्यजीविभिरभिहितम । तदाश्रावपि किंचिदुच्यतां ममापि वर्तते मतिः उक्तं च ।

[४]अशक्तैर्बलिनः शत्रोः कर्तव्यं प्रपलायनम् ।
संश्रितव्योथवा दुर्गो नान्या तेषां गतिर्भवेत् ॥ ३१९ ॥

तन्नून प्रभातसमये मत्स्यजीविनोत्र समागम्य मत्स्यमीक्षयं करिष्यन्ति । एतन्मम मनसि वर्तते । तत्र युक्तं सांप्रतं क्षणमप्यत्रावस्थातुम । उक्तं च ।

[५]वियमाना गतिर्येषामन्यत्रापि सुखावहा ।
ते न पश्यन्ति विद्वांसो देशभङ्गं कुलक्षयम् ॥ ३२० ॥

तदाकर्ण्य प्रत्युत्पन्नमतिः प्राह । अहो सत्यमभिहितं भवता । ममाप्यभीष्टमेतत । तदन्यत्र गम्यतामिति । उक्तं च ।

[७]परदेशभयाद्भीता बहुमाया नपुंसकाः ।
स्वदेशे निधनं यान्ति काकाः कापुरुषा मृगाः ॥ ३२१ ॥

[८]यस्यास्ति सर्वत्र गतिः स कस्मा-
त्स्वदेशरागेण हि याति नाशम ।

---

१ The means of our subsistence म. त. २ Resembling the fall or stroke of adamant कुलिशपातन इवमा यस्य तत् ब. व. ३ Even this very night. ४ Those, who are weak, should run away from a powerful enemy or should take shelter in a fort; they have no other alternative. संश्रितव्य: संधयितव्य. ५ Those wise men, who have a safe resort elsewhere, do not see the destruction of their country or family (by remaining where they are). सावावहा-सुखमावहतीति. उप. ६ Desirable, desired. ७ Those, who are very foolish and impotent, and also crows, mean persons and deer, being afraid of the difficulties of a foreign country, die in their own. ८ Why should he, who has access everywhere, bring down destruction upon himself through love for his own country; (for), it is the mean who drink salt water saying that the well (from which they drink) belongs to their father or is ancestral.

तातस्य कूपोऽयमिति ब्रुवाणाः
क्षारं जलं कापुरुषाः पिबन्ति ॥ ३२२ ॥

अथ तत्समाकर्ण्य प्रोच्चैर्विहस्य यज्ञविघ्नः प्रोवाच । अहो न भवद्भ्यां मन्त्रितं सम्यगेतदिति यतः किं वाडवाग्नेरपि तेषां पितृपैतामहिकमेतत्सरस्यकुं युज्यते । तयोर्युःक्षयोस्ति तदन्यत्र गतानामपि मृत्युर्भविष्यत्येव । उक्तं च ।

अरक्षितं तिष्ठति दैवरक्षितं
सुरक्षितं दैवहतं विनश्यति ।
जीवत्यनाथोऽपि वने विसर्जितः
कृतप्रयत्नोऽपि गृहे विनश्यति ॥ ३२३ ॥

तदहं न यास्यामि । भवद्भ्यां च यत्प्रतिभाति तत्कार्यम । अथ तस्य तं निश्चयं ज्ञात्वानागतविधाता प्रत्युत्पन्नमतिश्च निष्क्रान्तौ सह परिजनेन । अथ प्रभाते तैर्मत्स्यजीविभिर्जालैस्तज्जलाशयमालोड्य यज्ञविघ्नेन सह जलाशयो निर्मत्स्यीकृतो नीतः । अतोहं ब्रवीम्यनागतविधाता चेति ॥ तच्छ्रुत्वा टिट्टिभ आह । भद्रे किं मां यज्ञविघ्नसदृशं संभावयिष्यसि । तत्पश्य मे बुद्धिप्रभावं यावदेनं दुष्टसमुद्रं शोषयामि । टिट्टिभ्याह । अहो कस्त्वं समुद्रेण सह विग्रहः । तन्न युक्तमस्योपरि कोपं कर्तुम । उक्तं च यतः ।

---

१ Very loudly. प्रकर्षेण श्रुत्वा: २ Simply by hearing what they said. ३ Belonging to the father and grandfather, that is, ancestral, hereditary. ४ If our lives are at an end. ५ Will certainly happen. एव has here the force of *surely, as a matter of course.* ६ That which is unprotected stands protected by fate and that which is well-guarded, is destroyed when struck by fate; a person, though deserted in a forest without any help, lives, while one for whom great efforts are made does not live even at home. कृतप्रयत्नाः=कृताः प्रयत्नाः यस्य. ब. ७ What appears (proper). ८ तत् जलाशयं. कर्म. ९ Having churned or stirred (abs. of the caus. of क्षुद् 1 P. with आ). १० Rendered fish-less, not a fish was left. ११ How can you wage war with the sea? that is, there is great disparity between you and the sea.

[1]पुंसामसमर्थानामुपद्रवायात्मनो भवेत्कोपः ।
पिठरं कथयत्यतिमात्रं निजपार्श्वानेव दहत्यतिरौद्रम् ॥ ३२४ ॥

तथा च । [2]अविदित्वात्मनः शक्तिं परस्य च समुत्सुकः ।
गच्छन्नभिमुखो नाशं याति वह्नौ पतङ्गवत् ॥ ३२५ ॥

टिट्टिभ आह । प्रिये मा मैवं वद । येषामुत्साहशक्तिर्भवति ते स्वल्पा अपि गुरूनपि विक्रमन्ते । उक्तं च ।

[3]विशेषात्परिपूर्णस्य याति शत्रोरमर्षणः ।
आभिमुख्यं शशाङ्कस्य यथायापि विधुंतुदः ॥ ३२६ ॥

तथा च । [4]प्रमाणादधिकस्यापि गण्डश्यामदन्तिनः ।
पदं मूर्ध्नि समाधत्ते केसरी मत्तद्विपिनः ॥ ३२७ ॥

तथा च । [5]बालस्यापि रवेः पादाः पतन्त्युपरि भूभृताम् ।
तेजसा सह जातानां वयः कुत्रोपयुज्यते ॥ ३२८ ॥

तदनया चञ्चुवास्य सकलं तोयं शुष्कस्थलतां नयामि । टिट्टिभ्याह । भोः कान्त यत्र जाह्नवी नवनदीशतानि गृहीत्वा नित्यमेव प्रविशति

---

१ The anger of those people who are weak, becomes injurious to their own selves; a pot when it boils excessively burns its own sides all the more (and nothing else). २ This has been already translated. See verse 237. ३ The strength of energy. ४ Conquer, overcome. ५ A passionate man faces an enemy especially when he is full (prepared at all points), just as the demon Rāhu (विधुंतुद्) attacks the full-moon even now. विधुं तुदतीति. उप. He who troubles विधुं the moon. शशाङ्क.-शशः अङ्क यस्य. ब. ६ The lion places his foot on the head of an intoxicated elephant from the temples of which brown juice is dropping down, and which is larger in size. गण्डश्यामदन्तिन ought to have been गण्डच्युतश्यामदे. It is an irregular Bahu. Comp. ७ The rays even of the young sun fall on the mountains (the feet even of a young boy fall on the heads of kings). What is the use or need of the age of those who are born with lustre. पाद् (1) ray, (2) foot. भूभृत् (1) mountain, (2) king. ८ Shall make it dry ground; shall dry it up. ९ Nine hundred rivers नवनदीशतानि–नदीनां शतानि.

तथा सिन्धुश्च तत्कथं त्वमष्टादशनदीशतैः पूर्यमाणं तं विषुषवाहिन्या[1] त्वच्चा शोषयिष्यसि । तत्किमश्रद्धेयेनोक्तेन । टिट्टिभ आह । प्रिये ।

अतिवेदः[2] श्रियो मूलं चञ्चुर्मे लोहसंनिभा ।
अहोरात्राणि दीर्घाणि समुद्रः किं न शुष्यति ॥ ३२९ ॥

दुरधिगमः[3] परभागो[4] यावत्पुरुषेण पौरुषं न कृतम् ।
जयति तुलामधिरूढो भास्वानपि जलदपटलानि ॥ ३३० ॥

टिट्टिभ्याह । यदि त्वयावश्यं समुद्रेण सह वैरानुष्ठानं[5] कार्यं तद्न्यानपि विहगानाहूय सुहृज्जनसहित[6] एवं समाचर । उक्तं च ।

बहूनामप्यसाराणां[7] समवायो हि दुर्जयः ।
तृणैर्गुणत्वमापन्नैर्बध्यते मत्तदन्तिनः[8] ॥ ३३१ ॥

तथा च । चटकाकाष्ठकूटेन[9] मक्षिकादर्दुरैस्तथा[10] ।
महाजनविरोधेन कुञ्जरः प्रलयं गतः ॥ ३३२ ॥

टिट्टिभ आह । कथमेतत् । सा प्राह ।

---

१ Eighteen hundred rivers. २ Carrying only a drop. विषुषं वहतीति. ३ Absence of dejection is the root of prosperity (Cf. the English 'A faint heart never won a fair lady'), my beak is as hard as iron, will not then the sea be dry (if I work) for long days and nights? लोहसंनिभा. नृ. त. अहोरात्र is usually used in the masculine gender. ४ Superior excellence or merit is difficult to get only so long as a person has not put forth his manly power; even the sun dispels (lit. conquers) multitudes of clouds when it enters the sign Libra of the zodiac. The other meaning of तुलामधिरूढ is to be balanced against; when a person is balanced against another, he can easily conquer him. दुरधिगम=दुःखेन अधिगन्तुं शक्यः; परभागः—परभागी भाग: क It is equal to समर्थः. ५ Declaration of open hostility. ६ Accompanied with your friends or relations. ७ The union even of many trifling things is hard to overcome, (for) a rope is made up of grass whereby even an elephant is tied. असाराणां understand वस्तूनां. असार—नास्ति सारं यस्मिन्. ब. ८ An elephant was destroyed by the hostility with many people (creatures), viz., the sparrow, the wood-pecker, the fly and the frog. Properly speaking the first two padas ought to be चटका. काष्ठकूटाभ्यां and मक्षिकादर्दुराभ्यां respectively.

॥ कथा १५ ॥

कस्मिंश्चिद्वनोद्देशे चटकदंपती तमालतरुकृतनिलयौ[1] प्रतिवसतः। अथ गच्छता कालेन संततिरभवत्। अन्यस्मिन्नहनि[2] प्रमत्तो गजः कश्चिन्नं तमालवृक्षं घर्मार्तश्छायार्थी[3] समाश्रितः। ततो मदोत्कर्षात्[4] तस्य शाखां चटकाक्रान्तां पुष्करेणाकृष्य[5] बभञ्ज। तस्या भङ्गेन चटकाण्डानि सर्वाणि विशीर्णानि। आयुःशेषतया च चटका कथमपि प्राणैर्न वियुक्ता। अथ माण्डभर्तृभूता प्रलापान्कुर्वाणा न कंथंचिदतिष्ठत। अत्रान्तरे तस्यास्तान्प्रलापान्श्रुत्वा काष्ठकूटो नाम पक्षी तस्याः परमसुहृन्दुःखदुःखितोभ्येत्य तामुवाच। भवति किं वृथा प्रलापेन। उक्तं च।

[10]नष्टं मृतमतिक्रान्तं नानुशोचन्ति पण्डिताः।
पण्डितानां च मूर्खाणां विशेषोयं यतः स्मृतः॥ ३३३॥

तथा च।[11]अशोच्यानीह भूतानि यो मूढस्तानि शोचति।
स दुःखे लभते दुःखं द्वावनर्थौ निषेवते॥ ३३४॥

अन्यच्च।[12]श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोवशः।
तस्मान्न रोदितव्यं हि क्रियाः कार्याः प्रयत्नतः॥ ३३५॥

चटका प्राह। अस्त्येवैतत्। परं दुष्टगजेन मदान्मम संतानक्षयः[13]

---

१ Who had made their nests on a Tamala tree. तमालतरौ कृतः निलयः याभ्याम्. ब. २ Progeny, offspring. ३ Desirous of sitting in the shade. ४ Through excess of pride. ५ Occupied or inhabited by the sparrows. ६ Trunk. ७ Hurt, injured, broken. P. P. of भञ्ज् 9 P. with वि. ८ Overcome with sorrow for the loss of her eggs. ९ Never ceased, continued lamenting. १० The wise do not bewail what is lost, what is dead and what is past. This is, therefore, said to be the difference between wise men and fools (who do bewail &c). ११ In this world all created things (भूतानि) are not fit to be lamented, and that fool who bewails their loss, gets one calamity in another and thus suffers two. १२ Since the helpless dead person has to eat the phlegmatic tears dropped down (in weeping) by the relatives, no one should weep, but perform all the funeral rites with all efforts. १३ The destruction of my offspring.

कृतः । तथहि मम त्वं सुहृत्सत्यस्तस्य गजापसदस्य कोपि वधोपायश्चिन्त्यो यस्यानुष्ठानेन मे संततिर्नाशदुःखमपसरति । उक्तं च ।

आपदि येनोपकृतं येन च हसितं दशासु चान्यासु ।
उपकृदपकृदपि च तयोर्यस्तं पुरुषं परं मन्ये ॥ ३३६ ॥

काष्ठकूट आह । अवधि मन्यमभिहितं भवत्या । उक्तं च ।

स सुहृद्व्यसने यः स्यात्स पुत्रो यस्तु भक्तिमान् ।
स भृत्यो यो विधेयज्ञः सा भार्या यत्र निर्वृतिः ॥ ३३७ ॥

तत्पश्य मे बुद्धिप्रभावम् । परं ममापि सुहृद्भूता वीर्णारवा नाम मक्षिकास्ति । तन्नामाहूयागच्छामि येन स दुरात्मा दुष्टगजो हन्यते । अथासौ सह चटकया मक्षिकामामाय प्रोवाच । भद्रे मर्मज्ञैर्यं चटकां केनचिद्दुष्टगजेन पराभूताण्डस्फोटनेन । तन्नस्य वधोपायमनुतिष्ठतो मे साहाय्यं कर्तुमर्हसि । मक्षिकाप्याह । भद्र किमुच्यतेत्र विषये । उक्तं च ।

---

१ The lowest of elephants. अधम as a latter part of compounds has the sense of the "lowest," "worst" of &c. २ Grief consequent on the loss of my young ones. ३ Goes away, is removed. ४ I consider that to be the best man who confers benefits on him who has done him good in adversity, and injury to him who has laughed at him in his extreme circumstances. For अन्यासु there is another reading as विषमासु. उपकृत and अपकृत Pre. P. from कृ with उप and अप having for their objects तयोः. परं=परमं=श्रेष्ठं. ५ He is a friend in reality who is friendly in need, he is a son who is obedient (lit. knowing what to do) and she is a wife from whom one gets happiness. सुहृद् &c. Cf. the English proverb—"A friend in need is a friend indeed." ६ Having the sound of a lute. वीणाया इव रवो यस्याः. ब. ७ Having invited or brought. ८ My friend. ९ Breaking or destroying. १० Doing, carrying out, executing. ११ What more need you say on the subject ?, that is, what you have said is enough to induce me to assist you.

[1]पुनःप्रत्युपकाराय मित्राणां क्रियते प्रियम् ।
यत्पुनर्मित्रमित्रस्य कार्यं मित्रैर्न किं कृतम् ॥ ३३८ ॥

सत्यमेतत् । परं ममापि भेको मेघनादो नाम मित्रं तिष्ठति । तमाहूय यथोचितं कुर्मः । उक्तं च ।

[2]हितैः साधुसमाचारैः शास्त्रज्ञैर्मतिशालिभिः ।
कथंचिन्न विकल्पन्ते विद्वद्भिश्चिन्तिता[3] नयाः ॥ ३३९ ॥

अथ ते त्रयोपि गत्वा मेघनादस्याग्रे पूर्वं वृत्तान्तं निवेद्य तस्थुः । अथ स प्रोवाच । [4]कियन्मात्रो गजो नागको महाजनस्य कुपितस्य । तन्मद्दीयो मन्त्रः कर्तव्यः । मक्षिके त्वं गत्वा मध्याह्नसमये तस्य मदोत्कटस्य गजस्य कर्णे वीणारवसदृशं शब्दं कुरु येन श्रवणसुखलालसो निमीलितनयनो भवति । ततश्च काष्ठकूटच्च्वा स्फोटितनयनोन्धीभूतस्तृषार्तो मम [5]गर्ततटाश्रितस्य सपरिकरस्य[6] शब्दं श्रुत्वा जलाशयं मत्वाभ्येति । ततो गर्तमासाद्य पतिष्यति पञ्चत्वं[7] यास्यति चेति । एवं समवायैः[8] कर्तव्यो यथा वैरसाधनं [9]भवति । अथ तथानुष्ठिते स मत्तगजो मक्षिकागेयं[10]श्रवणसुखान्निर्गालितनयनः पश्चात्काष्ठकूटहृत[11]चक्षुर्मध्याह्नसमये भ्राम्यन्मण्डूकशब्दानुसारी गच्छन्महतीं गर्तामासाद्य पतितो मृतश्च ॥ अतोहं ब्रवीमि चटकाकाष्ठकूटेनेति ।

---

१ Any good is done to friends for an obligation in return; that business which is done for the friend of a friend-is that not said to be done by friends? २ The plans designed in consultation with friends of good conduct, versed in Shastras, endowed with talent and learned, do not change, or, are safe साधुसमाचार साधु समाचारः यस्य. ब. शालिन as a latter part of compounds means endowed with or possessed of. ३ Of what account is a poor elephant to many creatures got angry? that is, they can easily defeat him. ४ Resembling the sound of a lute. ५ Ardently desirous of the pleasure of the ear. ब. त. ६ A hollow; a hole. ७ Accompanied with my retinue. परिकरेण सहितस्य. ब. ८ Will die. पंचत्वं या or गम् means to separate into the five elements, and thus to die. ९ Union. १० Revenge will be taken or accomplished. ११ Hearing the song of the fly. १२ Whose eyes were taken out by the wood-pecker.

टिट्टिभ आह। भद्र एवं भवतु। क्षुद्रवर्गसमुदायेन समुद्रं शोषयिष्यामीति निश्चित्य वकसारसमयूरादीन्समाहूय प्रोवाच। भोः परभूतोहं समुद्रेणापकारेण तच्चिन्त्यतामस्य शोषणोपायः ते संमन्त्र्य प्रोचुः। अशक्ता वयं समुद्रशोषणे तत्किं वृथा प्रयासेन। उक्तं च।

[3]अबलः प्रोन्नतं शत्रुं यो याति मदमोहितः।
युद्धार्थं स निवर्तेत शीर्णदन्तो गजो यथा॥ ३४०॥

तदस्माकं स्वामी वैनतेयोस्ति। तनस्मै सर्वमेतत्परिभवस्थानं[4] निवेद्यते येन स्वजातिपरिभवकुपितो वैरनृण्यं[5] गच्छति। अथवात्रावलेपंकरिष्यति तथापि नास्ति वो दुःखम्। उक्तं च।

[6]सुहृदि निर्व्याजचित्ते गुणवति भृत्येनुवर्तिनि कलत्रे।
स्वामिनि शक्तिसमेते निवेद्य दुःखं सुखी भवति॥ ३४१॥

[7]तथामी वैनतेयसकाशं यतोसावस्माकं स्वामी। तथानुष्ठिते सर्वे ते पक्षिणो विवर्णवदना बाष्पपूरितदृशो वैनतेयसकाशमुपेत्य करुणस्वरेण फूत्कर्तुमारब्धाः। अहो अब्रह्मण्यमब्रह्मण्यम। अधुना सदाचारस्य टिट्टिभस्य भवति [10]नाथे सति समुद्रेणाण्डान्यपहृतानि। तत्यनष्टमधुना पक्षिकुलम। अन्येपि स्वेच्छया समुद्रेण व्यापादयिष्यन्ते। उक्तं च।

---

१ With a multitude of friends &c. २ We are unable to dry up the sea. ३ That weak person who through folly attacks a powerful enemy, will come back (shorn of his pride like an elephant &c.). ४ Let us report all this humiliation to him. ५ Will avenge the injury (lit. will be free from the debt of enmity &c.). ६ Or if he should show himself too proud to sympathize with us. ७ A man becomes happy by communicating the cause of his grief to a friend whose heart is the same with his (an intimate friend), to a meritorious servant, obedient wife and a master who is able. निरंतरश्चिते-निरंतरं चित्तं यस्य तस्मिन्. ब. ८ So let us go. ९ With the eyes filled with tears. बाष्पैः पूरिता दृशो यासां. १० Alas! alas! god forbid! ११ Your honour being the lord or king.

[1]एकस्य कर्म संवीक्ष्य करोत्यन्योपि गर्हितम् ।
गतानुगतिको लोको न लोकः पारमार्थिकः ॥ ३४३ ॥

तथा च । [2]चाटतस्करदुर्वृत्तैस्तथा साहसिकादिभिः ।
पीड्यमानाः प्रजा रक्ष्याः कूटच्छद्मादिभिस्तथा ॥ ३४३ ॥

[3]प्रजानां धर्मषड्भागो राज्ञो भवति रक्षितुः ।
अधर्मादपि षड्भागो जायते यो न रक्षति ॥ ३४४ ॥

[4]प्रजापीडनसंतापात्समुद्भूतो हुताशनः ।
राज्ञः श्रियं कुलं प्राणान्नादग्ध्वा विनिवर्तते ॥ ३४५ ॥

[5]राजा बन्धुरबन्धूनां राजा चक्षुरचक्षुषाम् ।
राजा पिता च माता च सर्वेषां न्यायवर्तिनाम् ॥ ३४६ ॥

[6]फलार्थी पार्थिवो लोकान्पालयेद्यत्नमास्थितः ।
दानमानादितोयेन मालाकारोद्रुमानिव ॥ ३४७ ॥

[7]यथा बीजाङ्कुरः सूक्ष्मः प्रयत्नेनाभिरक्षितः ।
फलप्रदो भवेत्काले तद्वल्लोकः सुरक्षितः ॥ ३४८ ॥

---

१ Having seen a censurable action done by one man, another does it; people are blind followers of customs and not the lovers of truth. गतानुगतिक = गतं अनुगच्छतीति following the bygones. पारमार्थिक adj. from परमार्थ the highest truth. २ Subjects should be protected from being persecuted by cheats, thieves, ill-behaved persons, adventurers and also by means of falsehood and other things. कूटच्छद्मनी आदिनी येषां ते ब. ३ A king who protects his subjects, gets one-sixth part of their religious merits; he also gets one-sixth part of their irreligion when he does not protect them. षड्भाग = षष्ठः भागः क. Instead of अधर्मादपि one would have expected अधर्मस्यापि. ४ The fire arising from the pain of the oppression of the subjects, does not return (become cool) without burning the wealth, family and life of the king. संताप also means heat, fire. ५ A king is the brother of the brotherless, and eye of the eyeless; a king is the father and mother of all those who act justly. अबंधु and अचक्षुस् are ब. न्यायेन वर्तते इति. डप्. ६ This verse is nearly the same as 220. ७ This is exactly equal to verse 223.

[1]हिरण्यधान्यरत्नानि यानानि विविधानि च ।
तथान्यदपि यत्किंचित्प्रजाभ्यः स्यान्नृपस्य तत् ॥ ३४९ ॥

अथैवं गरुडः सुमाकर्ण्य तदुःखदुःखितः कोपाविष्टश्च व्यचिन्तयत् । त्यमुक्तमेनैः पक्षिभिः । अहो तदस्य गत्वा तं समुद्रं शोषयामः । एवं चिन्तयतस्तस्य विष्णुदूतः समागत्याह । भो गरुत्मन्भगवता नारायणेनाहं तव[3] पार्श्वे प्रेषितः । देवकार्येण श्रीभगवानमरावत्यां यास्यतीति । तत्सन्वरमागम्यताम् । तच्छ्रुत्वा गरुडः साभिमानं प्राह । भो दूत किं मया कृभृत्येन भगवान्करिष्यति । तद्गत्वा तं वद यद्न्यो भृत्यो वाहनायास्मत्स्थानं[6] क्रियताम् । मदीयो नमस्कारो वाच्यो भगवतः । उक्तं च ।

[7]यो न वेत्ति गुणान्यस्य न तं सेवेत पण्डितः ।
न हि तस्मात्फलं किंचित्सुरुष्टादुष्टरादिव ॥ ३५० ॥

दूत आह । भो वैनतेय कदाचिदपि भगवन्तं प्रति त्वया नैतद्भिहितमीदृक् । तत्कथय किं ते भगवतापमानस्थानं[9] कृतम् । गरुड आह । भगवदाश्रयभूतेन[10] समुद्रेणास्मद्विहिताण्डान्यपहृतानि । तयाहि निर्गेहं न करोति तदहं भगवतो न भृत्य इत्येष निश्चयस्त्वया वाच्यः । तदुत्तरं गत्वा भवता भगवतः समीपे गन्तव्यम् । अथ दूतमुखेन प्रणयकुपितं वैनतेयं विज्ञाय भगवांश्चिन्तयामास । अहो स्थानं कोपो वैनतेयस्य । तत्स्वयमेव गत्वा समानपुरःसरं तमानयामि । उक्तं च ।

[16]भक्तं शक्तं कुलीनं च न भृत्यमपमानयेत् ।
पुत्रवल्लालयेन्नित्यं य इच्छेच्छ्रेय आत्मनः ॥ ३५१ ॥

---

१ This is nearly equal to 221. २ Let us dry; we shall dry. ३ Have been sent to you. ४ On an errand of the gods. ५ With pride or egotism. अभिमानेन सह यथा तथा. अव्य. ६ Be appointed in my place. ७ Let my humble respects be paid to the god? Give him my respects. ८ This verse is nearly equal to 47. ९ The place or object of insult or disrespect; cause of disrespect. १० Being a sheltering place, that is, the vehicle or seat of &c. ११ Punishment or chastisement. १२ Angry through love or affection. १३ In the proper place; right, just. १४ He, who wishes for his own welfare, should never disrespect a servant who is devoted, able and nobly-born, but should treat him affectionately like a son.

[1]एकस्य कर्म संवीक्ष्य करोत्यन्योपि गर्हितम् ।
गतानुगतिको लोको न लोकः पारमार्थिकः ॥ ३४३ ॥

तथा च । [2]चाटतस्करदुर्वृत्तैस्तथा साहसिकादिभिः ।
पीड्यमानाः प्रजा रक्ष्याः कूटच्छद्मादिभिस्तथा ॥ ३४३ ॥

[3]प्रजानां धर्मषड्भागो राज्ञो भवति रक्षितुः ।
अधर्मादपि षड्भागो जायते यो न रक्षति ॥ ३४४ ॥

[4]प्रजापीडनसंतापात्समुद्भूतो हुताशनः ।
राज्ञः श्रियं कुलं प्राणान्नादग्ध्वा विनिवर्तते ॥ ३४५ ॥

[5]राजा बन्धुरबन्धूनां राजा चक्षुरचक्षुषाम् ।
राजा पिता च माता च सर्वेषां न्यायवर्तिनाम् ॥ ३४६ ॥

[6]फलार्थी पार्थिवो लोकान्पालयेद्यत्नमास्थितः ।
दानमानादितोयेन मालाकारोद्भुमानिव ॥ ३४७ ॥

[7]यथा बीजाङ्कुरः सूक्ष्मः प्रयत्नेनाभिरक्षितः ।
फलप्रदो भवेत्काले तद्वल्लोकः सुरक्षितः ॥ ३४८ ॥

---

१ Having seen a censurable action done by one man, another does it; people are blind followers of customs and not the lovers of truth. गतानुगतिक = गते अनुगच्छतीति following the bygones. पारमार्थिक adj. from परमार्थ the highest truth. २ Subjects should be protected from being persecuted by cheats, thieves, ill-behaved persons, adventurers and also by means of falsehood and other things. कूटच्छद्मनी आदिनी येषां ते. ब. ३ A king who protects his subjects, gets one-sixth part of their religious merits; he also gets one-sixth part of their irreligion when he does not protect them. षड्भाग = षष्ठः भागः क. Instead of अधर्मादपि one would have expected अधर्मरयापि. ४ The fire arising from the pain of the oppression of the subjects, does not return (become cool) without burning the wealth, family and life of the king. संताप also means heat, fire. ५ A king is the brother of the brotherless, and eye of the eyeless; a king is the father and mother of all those who act justly. अबंधु and अचक्षुषि are ब. न्यायेन वर्तते इति. उप. ६ This verse is nearly the same as 220. ७ This is exactly equal to verse 223.

[1]हिरण्यधान्यरत्नानि यानानि विविधानि च ।
तथान्यदपि यत्किंचित्प्रजाभ्यः स्यान्नृपस्य तत् ॥ ३४९ ॥

अथैवं गरुडः मुमाकर्ण्य तद्दुःखदुःखितः कोपाविष्टश्च व्यचिन्तयत् । नित्यमुक्तमेनैः पक्षिभिः । अहो तदस्य गत्वा तं समुद्रं शोषयामः । एवं चिन्तयतस्तस्य विष्णुदूतः समागत्याह । भो गरुत्मन्भगवता नारायणेनाहं तव[3] पार्श्वे प्रेषितः । देवकार्येण श्रीभगवानमरावत्यां यास्यतीति । तत्सत्वरमागम्यताम् । तच्छ्रुत्वा गरुडः साभिमानं प्राह । भो दूत किं मया कृभृत्येन भगवान्करिष्यति । तद्गत्वा तं वद यद्भ्यो भृत्यो वाहनायास्मत्स्थानं[6] क्रियताम् । मदीयो नमस्कारो वाच्यो भगवतः । उक्तं च ।

[7]यो न वेत्ति गुणान्यस्य न तं सेवेत पण्डितः ।
न हि तस्मात्फलं किंचित्सुकृष्टादूषरादिव ॥ ३५० ॥

दूत आह । भो वैनतेय कदाचिदपि भगवन्तं प्रति त्वया नैतदभिहितमीदृक् । तत्कथय किं ते भगवतापमानस्थानं[9] कृतम् । गरुड आह । भगवदाश्रयभूतेन[10] समुद्रेणास्मद्दिदृक्षाभाङ्नान्यपहृतानि । तदहं निर्मर्यादं[11] न करोमि तदहं भगवतो न भृत्य इत्येष निश्चयस्त्वया वाच्यः । तदेतत्तूर्णं गत्वा भवता भगवतः समीपे गन्तव्यम । अथ दूतमुखेन प्रणयकुपितं[12] वैनतेयं विज्ञाय भगवांश्चिन्तयामास । अहो स्थानं कोपो वैनतेयस्य । तत्स्वयमेव गत्वा समानपुरःसरं समानयामि । उक्तं च ।

[13]भक्तं शक्तं कुलीनं च न भृत्यमपमानयेत् ।
पुत्रवल्लालयेन्नित्यं य इच्छेच्छ्रेय आत्मनः ॥ ३५१ ॥

---

१ This is nearly equal to 221. २ Let us dry; we shall dry. ३ Have been sent to you. ४ On an errand of the gods. ५ With pride or egotism. अभिमानेन सह यथा तथा. अव्य. ६ Be appointed in my place. ७ Let my humble respects be paid to the god? Give him my respects. ८ This verse is nearly equal to 47. ९ The place or object of insult or disrespect; cause of disrespect. १० Being a sheltering place, that is, the vehicle or seat of &c. ११ Punishment or chastisement. १२ Angry through love or affection. १३ In the proper place; right, just. १४ He, who wishes for his own welfare, should never disrespect a servant who is devoted, able and noble-born, but should treat him affectionately like a son.

अन्यच्च । राजा तुष्टोपि भृत्यानामर्थमात्रं प्रयच्छति ।
ते तु संमानमात्रेण प्राणैरप्युपकुर्वते ॥ ३५२ ॥

इत्येवं संप्रधार्य रुक्मपुरं वैनतेयसकाशं सत्वरमगमत् । वैनतेयोपि गृहागतं भगवन्तमवलोक्य त्रपाधोमुखः प्रणम्यावाच । भगवन् त्वदाश्रयोन्मत्तेन समुद्रेण मम भृत्यस्याण्डान्यपक्रम्य क्षेपमानस्थानं कृतम् । परं युष्मल्लज्जयाहं तं स्थलतो न नयामीति यतः स्वामिभयाच्छुनोपि प्रहारो न दीयते । उक्तं च ।

"येन स्यात्लघुता वाथ पीडा चित्ते प्रभोः क्वचित् ।
प्राणत्यागेपि तत्कर्म न कुर्यात्कुलसेवकः ॥ ३५३ ॥

तच्छ्रुत्वा भगवानाह । भो वैनतेय यदभिहितं भवता । उक्तं च ।

"भृत्यापराधजो दण्डः स्वामिनो जायते यतः ।
तेन लज्जापि तस्योत्था न भृत्यस्य तथा पुनः ॥ ३५४ ॥

तदागच्छ येनाण्डानि समुद्रादादाय टिट्टिभं संभावयावोमरावर्ती च गच्छावः । तथानुष्ठिते समुद्रो भगवता निर्भर्त्स्यांघ्रेर्यशः संधोयाभिहितः । भो दुरात्मन्दीयन्तां टिट्टिभाण्डानि नो चेत्स्थलतो त्वां नयामि । ततः समुद्रेण सभयेन टिट्टिभाण्डानि तानि प्रदत्तानि टिट्टिभेनापि भार्यायै समर्पितानि ।

अतोहं ब्रवीमि शत्रोर्बलमविज्ञायेति ।

तस्मात्पुरुषेणोद्यमो न त्याज्यः । तदाकर्ण्य संजीवकस्तमेव भूयोपि पप्रच्छ । भो मित्र कथं ज्ञेयो मयासौ दुष्टबुद्धिरिति । इयन्तं कालं

---

१ This verse is equal to 83. २ With the head hung down through shame. ३ Intoxicated or grown insolent by the fact of his being your seat or abode. ४ Through fear of bringing shame upon you. ५ One who is a hereditary servant, should not do that action, which will detract from the merit, or cause pain to the mind of the master, even though he (servant) be at the point of death. ६ Since punishment is awarded to a master for the the offences of his servant, the shame thereof should also be his and not of the servant. तस्योत्था=भृत्योत्था-भृत्यात् तत्था proceeding from the actions of the servant. ७ Being scolded or taken to task. ८ Belonging to or presided over by fire. ९ Having aimed. १० Industry, effort. ११ Up to this time.

उत्तरोत्तरस्नेहेन प्रसादेन चाहं दृष्टो न कदाचिन्नदृष्टपूर्वो[1]। प्रयतां येनाहमात्मरक्षार्थं तदुपाय च यते। दमनक आह। भद्र ज्ञेयम्[2]। एष ते प्रत्ययः। यदि रक्तनेत्रत्रिशिखां[3] भ्रुकुटिं दधाद्वक्त्रिणी परिलेलिहत्त्वां दृष्ट्वा भवति तदुष्टबुद्धिरन्यथा सुप्रसादः[4]। तदाज्ञापय मां[5]। स्वाश्रयं प्रति गच्छामि। त्वया च यथायं भेदो न भवति तथा कार्यम् यदि निर्शामुखं प्राप्य गन्तुं शक्नोषि[6]। त्यागः कार्यः। यतः।

[7]त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत।
ग्रामं जनपदस्यार्थ आत्मार्थे पृथिवीं त्यजेत ॥ ३५५ ॥

[8]आपदर्थे धनं रक्षेद्दारान्रक्षेद्धनैरपि।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ ३५६ ॥

बलवताभिभूतस्य विदेशगमनं तदनुप्रवेशो वा नीतिः। तद्देशत्यागः कार्यः। अथवात्मा सामादिभिरुपायैरभिरक्षणीयः। उक्तं च।

[9]अपि पुत्रकलत्रैर्वा प्राणान्रक्षेत पण्डितः।
विद्यमानैर्यतस्तैः स्यात्सर्वं भूयोपि देहिनाम् ॥ ३५७ ॥

---

१ I have been treated with increasing affection and favour. २ Seen, found (by me). ३ With red eyes. रक्ते नेत्रे यस्य स. ब. ४ Contracting his eye-brows into three wrinkles (as a sign of anger). ५ Well-pleased. ६ Evening (lit. the face of the night). ७ One should sacrifice one individual for the good of the family, the family for the sake of the village, and the village for the good of the country, and the whole earth for one's own sake. ८ One should save wealth against the time of difficulty, save the life of the wife, even at the sacrifice of wealth, and should always save himself even at the sacrifice of both wife and wealth. ९ It is a politic step that when a man is defeated by a powerful person, he should either go to a foreign country or accommodate himself to his whims and thus gain him over. १० A wise man should save his life even at the sacrifice of his son and wife, since it (life) being in existence, men will again obtain every thing (lost before).

तथा च । [1]येन केनाप्युपायेन शुभेनाप्यशुभेन वा ।
उद्धरेदीनमात्मानं समर्थो धर्ममाचरेत् ॥ ३५८
[2]यो मायां कुरुते मूढः प्राणत्यागे धनादिके ।
तस्य प्राणाः प्रणश्यन्ति तैर्नष्टैर्नष्टमेव तत् ॥ ३५९ ॥

एवमभिधाय दमनकः करटकसकाशमगमत् । करटकोपि तमायान्तं दृष्ट्वा पोवाच । भद्र किं कृतं तत्र भवता । दमनक आह । मया तावच्छ्रीतिबीजनिर्वापणं कृतं परतो [3]दैवविहितायत्नम् । उक्तं च यतः ।

[4]पराङ्मुखेपि दैवेत्र कृत्यं कार्यं विपश्चिता ।
आत्मदोषविनाशाय स्वचित्तस्तम्भनाय च ॥ ३६० ॥

तथा च । [5]उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवं हि दैवमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोत्र दोषः ॥ ३६१ ॥

---

१ By any remedy whatever, either fair or foul one should save his poor soul, (for) one who is prosperous can be virtuous. २ That fool who uses tricks &c. to preserve his wealth and other things at the time of death, loses his life and that (life) being lost, everything else is (of course) lost. तैर्नष्टै —Is an example of the Instrumental absolute in Sanskrit. ३ The sowing of the seeds of policy. ४ Everything further depends on the will of Fate. दैवविहित=दैवविधान or विधि-what is ordained by Fate. दैवविहिते आयत्नम्. स. ५ Even though destiny be adverse, a wise man should do his duty here, to prevent any blame being attached to himself, and to stop the yearning of his heart. आत्मदोष would be blame at the hands of others if he be idle, and स्वचित्तस्तम्भन-stopping the heart, *i. e.*, the desire of the heart. ६ The goddess of wealth resorts to that excellent man who is industrious; it is the cowardly that say that Fate is fate; that is, that which is destined to happen, will happen; having put down fate, put forth your manly power to the best of your abilities; if any thing does not succeed when efforts are made for its accomplishment, what fault is there ?, *i. e.* we are not to blame. पुरुषसिंह—पुरुषः सिंह इव. क.

करटक आह । तत्कथय कीदृक्त्वया नीतिबीजं निर्वापितम् । सो-
मयाभोग्यं ताभ्यां मिथ्याप्रजल्पनेन भेदस्तथा विहितो
मयोपि मन्त्रयन्तावेकस्थानस्थितौ न पश्यसि । करटक आह ।
न युक्तं भवता विहितं यत्परस्परं तौ स्नेहार्द्रहृदयौ सुखाश्रयौ
सागरे प्रक्षिप्तौ । उक्तं च ।

अधिरुढं सुखस्थं यो दुःखमार्गे नियोजयेत ।
जन्मजन्मान्तरं दुःखी स नरः स्यादसंशयम् ॥ ३६२ ॥

अपरं त्वं यद्भेदमात्रेणापि तुष्टस्तदप्ययुक्तं यतः सर्वोपि जनो वि-
कारेण समर्थो भवति नोपकर्तुम । उक्तं च ।

घातयितुमेव नीचः परकार्यं वेत्ति न प्रसाधयितुम ।
पातयितुमेव शक्तिर्नाखोरुद्धर्तुमम्भसिप्टम् ॥ ३६३ ॥

दमनक आह । अनभिज्ञो भवान्नीतिशास्त्रस्य तेनैतदुक्तवानसि ।
उक्तं च यतः ।

जातमात्रं न यः शत्रुं व्याधिं च प्रशमं नयेत ।
महाबलोपि तेनैव वृद्धिं प्राप्य स हन्यते ॥ ३६४ ॥

तच्छत्रुभूतोयमस्माकं मन्त्रिपदापहरणात । उक्तं च ।

---

१ Has reference to भेद. २ By making false statements to them. ३ Breach, rupture. ४ That you will not see them in one place consulting with each other. ५ Friendly disposed towards each other. ६ Living in happiness. ७ There is no doubt that the man, who directs to a path of misery a man who is not against any body and is in happiness, will be miserable in every birth or existence. सुखस्थं = सुखे तिष्ठतीति. उप. जन्मजन्मान्तरे=in this and another birth. अस्मिन् जन्मनि अन्यस्मिंश्च. ८ Satisfied with merely having brought about a rupture between them. ९ In doing what is evil or undesirable. १० A wicked person knows only how to spoil other's business and not to accomplish it; a mouse has strength only to throw down a basket of food and not to lift it up. ११ See verse 233. १२ He has become our enemy by having usurped the post of minister.

[1]पितृपैतामहं स्थानं यो यस्यात्र जिगीषते ।
स तस्य सहजः शत्रुरुच्छेद्योपि प्रिये स्थितः[2] ॥ ३६५ ॥

तन्मया स उदासीनतया[3] समानीतोभयप्रदानेन यावन्नावद्[4]धमपि तेन साचिव्यात्प्रच्यावितः । अथवा साध्विदमुच्यते ।

[5]दद्यात्साधुर्यदि निजपदे दुर्जनाय प्रवेशं
तन्नाशाय प्रभवति ततो वाञ्छमानः स्वयं सः ।
तस्माद्देयो विपुलमतिभिर्नावकाशोधमानां
जारोपि स्याद्गृहपतिरिति श्रूयते वाक्यतोत्र ॥ ३६६ ॥

तेन मया तस्योपरि वधोपाय एष विरच्यते । [6]देशत्यागाय वा भविष्यति । तच्च त्वां मुक्त्वान्यो न ज्ञास्यति । [7]तद्युक्तमेतत्स्वार्थायानुष्ठितम् । उक्तं च यतः ।

[8]निस्त्रिंशं हृदयं कृत्वा वाणीं चेक्षुरसोपमाम् ।
दुःखं तत्र न कर्तव्यं हन्यात्तत्रापकारिणम् ॥ ३६७ ॥

---

१ He, who wishes to deprive a person of a post which is hereditary, is his natural enemy and should be destroyed though he be kindly disposed towards him. जिगीषते desid. of जि 1 P. to conquer. उच्छेद्योपि &c. construe स. प्रिये स्थितोपि उच्छेद्य. २ Indifferently; disinterestedly. ३ As soon as &c. ४ Deprived of counsellorship. प्रत्यावित P. P. of the caus. of च्यु 1 A. ५ If a good man allow a wicked person access to his own post, he becomes himself able to destroy him, if he wish to do so; therefore, those who are possessed of great talents should give no access to the mean; it is heard from popular saying that even a paramour will be the master of a house. वाक्यतः from words, *i. e.* popular saying. ६ Is designed; planned. ७ (What I have done) will result in his leaving the country. ८ Having made the heart relentless and the speech as sugar-cane juice, no sorrow should be felt and an evil-doer should be killed; तत्र in that case (where one can serve his purpose by destroying his enemy).

अपरं मृतोप्यस्माकं भोज्यो भविष्यति। तदेकं तावद्वैरसाधनम्। परं सात्विध्यं च भविष्यति तृप्तिश्चेति। तद्गुणत्रयेस्मिंश्चुपस्थिते कस्मिन्नपि वृषयसि त्वं जाड्यभावात्। उक्तं च।

परस्य पीडनं कुर्वन्स्वार्थसिद्धिं च पण्डितः।
मूढबुद्धिर्न भक्षेत वने चतुरको यथा ॥ ३६८ ॥

करटक आह। कथमेतत्। स आह।

॥ कथा १६ ॥

अस्ति कस्मिंश्चिद्वनोद्देशे वज्रदंष्ट्रो नाम सिंहः। तस्य चतुरकशङ्कव्यमुखनामानौ शृगालवृकौ सदानुगतौ तत्रैव प्रतिवसतः। अथान्यदिने सिंहेन कदाचिदासन्नप्रसवा प्रसववेदनया स्वयूथाद्भ्रष्टोष्ट्रयूपविष्टा कस्मिंश्चिद्वनोद्देशे समासादिता। अथ तां व्यापाद्य यावदुदरं स्फाटयति तावज्जीर्णघुदासेरकशिशुर्निष्क्रान्तः। सिंहोपि दासेरक्या पिशितेन सपरिवारः परां तृप्तिमुपागतः परं स्नेहात्स दासेरकं गृहमानीयेदमुवाच। भद्र न तेस्ति मृत्योर्भयं मत्तो नान्यस्मादपि। ततः स्वेच्छयात्र वने भ्रम्यतामिति। यतस्ते शङ्कुसदृशौ कर्णावतः शङ्कुकर्णो नाम भविष्यसि। एवमनुष्ठिते चत्वारोपि त एकस्थाने विहारिणः परस्परमनेकप्रकारैर्गोष्ठीसुखमनुभवन्तस्तिष्ठन्ति। शङ्कु-

---

१ The accomplishing of revenge. २ When three such advantages are before us. ३ Through stupidity. ४ A wise person whose intellect is confused will not eat, if by so doing he can oppress his enemy and accomplish his own end, as was done by Chaturaka in the forest. ५ Having jaws of adamant, that is, jaws as hard as &c. ६ Being always in attendance. ७ Being near her confinement; about to be confined. ८ By the pangs of delivery. ९ Break open. (Caus. of स्फुट् 6 P.) १० A young one of camel. दासेरक एव क्रियः. क. ११ The she-camel. १२ Resembling a cone. १३ Enjoying the pleasure of conversation on various subjects.

[1]पितृपैतामहं स्थानं यो यस्यात्र जिगीषते ।
स तस्य सहजः शत्रुरुच्छेद्योपि प्रिये स्थितः[2] ॥ ३६५ ॥

तन्मया स उदासीनतया[3] समानीतोभयप्रदानेन यावन्नावदहमपि तेन साचिव्यात्प्रच्यावितः[4]। अथवा साध्विदमुच्यते ।

[5]दद्यात्साधुर्यदि निजपदे दुर्जनाय प्रवेशं
तन्नाशाय प्रभवति ततो वाञ्छमानः स्वयं सः ।
तस्माद्देयो विपुलमतिभिर्नाधिकाशोधमानां
जारोपि स्यादृगृहपतिरिति श्रूयते वाक्यतोत्र[6] ॥ ३६६ ॥

तेन मया तस्योपरि वधोपाय एष विरच्यते[7]। [8]देशत्यागाय वा भविष्यति। तच्च त्वां मुक्त्वान्यो न ज्ञास्यति। [9]तयुक्तमेतत्स्वार्थायानुष्ठितम्। उक्तं च यतः।

[10]निस्त्रिंशं हृदयं कृत्वा वाणीं चेक्षुरसोपमाम् ।
दुःखं तत्र न कर्तव्यं हन्यात्तत्रापकारिणम् ॥ ३६७ ॥

---

१ He, who wishes to deprive a person of a post which is hereditary, is his natural enemy and should be destroyed though he be kindly disposed towards him. जिगीषते desid. of जि 1 P. to conquer. उच्छेद्योपि &c. construe स. प्रिये स्थितोपि उच्छेद्यः २ Indifferently; disinterestedly. ३ As soon as &c. ४ Deprived of counsellorship. प्रच्यावित P. P. of the caus. of च्यु 1 A. ५ If a good man allow a wicked person access to his own post, he becomes himself able to destroy him, if he wish to do so; therefore, those who are possessed of great talents should give no access to the mean; it is heard from popular saying that even a paramour will be the master of a house. वाक्यतः from words, *i. e.* popular saying. ६ Is designed; planned. ७ (What I have done) will result in his leaving the country. ८ Having made the heart relentless and the speech as sweet as sugar-cane juice, no sorrow should be felt and an evil-doer should be killed: तत्र in that case (where one can serve his purpose by destroying his enemy).

अपरं मृतोप्यस्माकं भोज्यो भविष्यति। तदेकं तावद्वैरसाधनम्। परं साचिव्यं च भविष्यति तृप्तिश्चेति। तद्गुणप्रयेसिंहेषुपस्थिते कृतघ्नो दूषयसि त्वं जाल्मभावात्। उक्तं च।

परस्य पीडनं कुर्वन्स्वार्थसिद्धिं च पण्डितः।
मूढबुद्धिर्न भक्षेत वने चतुरको यथा ॥ ३६८ ॥

करटक आह। कथमेतत्। स आह।

॥ कथा १६ ॥

अस्ति कस्मिंश्चिद्वनोद्देशे वज्रदंष्ट्रो नाम सिंहः। तस्य चतुरकशृगालमुखनामानौ शृगालवृकौ सदानुगतौ तत्रैव प्रतिवसतः। अथान्यदिने सिंहेन कदाचिदासन्नप्रसवा प्रसववेदनया स्वयूथाद्भ्रष्टोष्ट्रयूपविद्या कस्मिंश्चिद्वनोद्देशे समासादिता। अथ तां व्यापाय यावदुदरं स्फाटयति तावज्जीवंजीवघुदाभेरकशिशुर्निष्क्रान्तः। सिंहोपि दासेरक्याः पिशितेन सपरिवारः परां तृप्तिमुपागतः परं स्नेहात्स दासेरकं गृहमानीयेदमुवाच। भद्र न तेस्ति मृत्योर्भयं मत्तो नान्यस्मादपि। ततः स्वेच्छयात्र वने भ्रम्यतामिति। यतस्ते शङ्कुमेदृशौ कर्णावतः शङ्कुकर्णो नाम भविष्यसि। एवमनुष्ठिते चत्वारोपि त एकस्थाने विहारिणः परस्परमनेकप्रकारंगोष्ठीसुखमनुभवन्तस्तिष्ठन्ति। शङ्कु-

---

१ The accomplishing of revenge. २ When three such advantages are before us. ३ Through stupidity. ४ A wise person whose intellect is confused will not eat, if by so doing he can oppress his enemy and accomplish his own end, as was done by Chaturaka in the forest. ५ Having jaws of adamant, that is, jaws as hard as &c. ६ Being always in attendance. ७ Being near her confinement; about to be confined. ८ By the pangs of delivery. ९ Break open. (Caus. of स्फट् 6 P.) १० A young one of camel. दासेरक एव दासेरकः. क. ११ The she-camel. १२ Resembling a cone. १३ Enjoying the pleasure of conversation on various subjects.

कर्णोपि यौवनपदवीमारूढः[१] क्षणमपि न तं सिंहं मुञ्चति । अथ कदाचिद्वज्रदंष्ट्रस्य केनचिद्वन्येन मत्तगजेन सह युद्धमभवत् । तेन मदवीर्यात्स दन्तप्रहारैस्तथा क्षतशरीरो विहितो[२] यथा प्रचलितुं न शक्नोति । तत्क्षुत्क्षामस्तान्प्रोवाच । भो भवन्तः । अन्विष्यतां किंचित्सत्त्वं येनाहमेवंस्थितोपि तव्यापाद्यात्मनो युष्माकं च क्षुत्प्रणाशं करोमि । तच्छ्रुत्वा ते त्रयोपि वने संध्याकालं यावद्भ्रान्ताः परं न किंचित्सत्त्वमासादितम् । अथ चतुरकश्चिन्तयामास । यदि शङ्कुकर्णोयं व्यापाद्यते ततः सर्वेषां कतिचिद्दिनानि तृप्तिर्भवति परं नैवं स्वामी मित्रत्वाद्[३]श्रयसमाश्रितत्वाच्च विनाशयिष्यति । अथवा बुद्धिप्रभावेण स्वामिनं प्रतिबोध्य तथा करिष्ये यथा व्यापादयिष्यति । उक्तं च ।

[४]अवध्यं चाप्यवाग्यमकृत्यं नास्ति किंचन ।
लोकं बुद्धिमतां बुद्धेस्तस्मात्तां विनियोजयेत् ॥ ३६९ ॥

एवं विचिन्त्य शङ्कुकर्णमिदमाह । भोः शङ्कुकर्ण स्वामी तावत्पथ्यं विना क्षुधया पीड्यते । स्वाम्यभावादस्माकमपि ध्रुवं विनाश एव । ततो वाक्यं किंचित्स्वौम्यर्थे वदिष्यामि । तच्छ्रूयताम् । शङ्कुकर्ण आह । भोः शीघ्रं निवेद्यतां येन ते वचनं शीघ्रं निर्विकल्पं करोमि । अपरं स्वामिनो[५] हिते कृते मया सुकृतशतं[६] कृतं भविष्यति । अथ चतुरक आह । भो भद्र आत्मशरीरं द्विगुणलोभेन प्रयच्छ येन ते द्विगुणं शरीरं भवति स्वामिनः पुनः प्राणयात्रा भवति । तदा-

---

१ Attained his youth. २ Wild. ३ Was wounded. ४ The satisfying of hunger. ५ By reason of his having taken shelter with him. ६ There is nothing in this world tnat is difficult to destroy, inaccessible, and unfit to do, for the talent of the talented ; therefore, one should use it. ७ I shall say something or propose something to you for the sake of our lord (the lion). ८ Without any doubt or suspicion. ९ When I have done the welfare of the lord ; if I do what is for the welfare of our lord. १० I shall have done a hundred righteous actions. ११ For two-fold benefit.

कर्ण्य शङ्कुकर्णः प्राह । भद्र यथेवं तन्मदीयप्रयोजनमितदुच्यताम् । स्वाम्यर्थः क्रियतामिति । परमत्र धर्मः प्रतिभूरिति ते विचिन्त्य सर्वे सिंहसकाशमाजग्मुः । ततश्चतुरक आह । देव न किंचित्सत्त्वं प्राप्तम् । भगवानादिवराहोप्यस्तंगतः । तयदि स्वामी द्विगुणं शरीरं प्रयच्छति ततः शङ्कुकर्णोयं द्विगुणवृद्धया स्वशरीरं प्रयच्छति धर्मप्रतिभुवा । सिंह आह । भो यथेवं तत्सुन्दरतरम । व्यवहारस्यास्य धर्मः प्रतिभूः क्रियतामिति । अथ सिंहवचनानन्तरं वृकशृगालाभ्यां विदारितोभयकुक्षिः शङ्कुकर्णः पञ्चत्वमुपगतः । अथ वज्रदंष्ट्रश्चतुरकमाह । भोश्चतुरक यावदहं नदीं गत्वा स्नानदेवर्तार्चनविधिं कृत्वागच्छामि तावत्त्वयाश्रमपदेन भाव्यमित्युक्त्वा नद्यां गतः । अथ तस्मिन्गते चतुरकश्चिन्तयामास । कथं ममैकाकिनोभोज्योयमुष्टो भविष्यतीति विचिन्त्य क्रव्यमुखमाह । भोः क्रव्यमुख क्षुधालुर्भवान् । तथावदसौ स्वामी नागच्छति तावत्त्वमस्योष्ट्रस्य मांसं भक्षय । अहं त्वां स्वामिनो निर्देशं प्रतिपादयिष्यामि । सोपि तच्छ्रुत्वा यावत्किंचिन्मांसमास्वादयति तावच्चतुरकेणोक्तम् । भोः क्रव्यमुख समागच्छति स्वामी । तत्यक्त्वैनं दूरे निष्ठ येनास्य भक्षणं न विकल्पयति । तथानुष्ठिते सिंहः

---

१ Let this my *readiness to serve the use of our lord* be reported to him (lion); that is, let the lion know that I am ready even to sacrifice my life for his. २ Thinking that justice was their surety having thought that justice was pledged &c. ३ For double the amount (the original and the principle being equal). ४ Justice being its security. धर्मः प्रतिभूर्यस्या सा. ब. qualifying द्विगुणवृद्धया. ५ Bargain, contract, transaction. ६ Bathing and worshipping gods. ७ To be eaten by (me) alone. ८ The wolf. ९ I shall plead your innocence in the presence of our lord. १० Suspect or doubt. Having स or स्वामी for its subject.

समायातो यावदुष्ट्रं पश्यति तावद्विक्लीकृतहृदयो दामनकः । ततो भ्रूकुटिं कृत्वा परुषतरमाह । अहो केनैष उष्ट्र उच्छिष्टता नीतो येन तमपि व्यापादयामि । एवमभिहिते करभमुखश्चतुरकमुखमवलोकयति । किमेतद्वद किंचियेन मम शान्तिर्भवति । अथ चतुरको विहस्योवाच । भो मामनादृत्य पिशितं भक्षयित्वाधुना मन्मुखमवलोकयसि । तदास्वादयास्य दुर्नयतरोः फलमिति । तदाकर्ण्य करभमुखो जीवनाशभयाद्दूरंदेशं गतः । एतस्मिन्नन्तरे तेन मार्गेण दामनकसार्थो भाराक्रान्तः समायातः । तस्याग्रगोष्ट्रस्य कण्ठे महती घण्टा बद्धा । तस्याः शब्दं श्रुत्वाकर्ण्य सिंहो जम्बुकमाह । भद्र ज्ञायतां किमेष रौद्रः शब्दः श्रूयतेऽधुनापूर्वः । तच्छ्रुत्वा चतुरकः किंचिद्दूरान्तरं गत्वा सत्वरमभ्युपेत्य प्रोवाच । स्वामिन्गम्यतां गम्यतां यदि शक्नोषि गन्तुम । सोऽब्रवीत । भद्र किमेवं व्याकुलो दृश्यसे । तत्कथय किमेतदिति । चतुरक आह । स्वामिन एष धर्मराजस्तवोपरि कुपितो यदनेनाकाले दामनकोयं मदीयो व्यापादितस्तन्महस्रगुणमुष्ट्रमस्य सकाशाद्ग्रहीष्यामीति निश्चित्य बृहन्मानमौदायायेमस्योष्ट्रस्य ग्रीवायां घण्टां बद्ध्वा वध्यैदामनकसकाशेनापि पितृपितामहानादाय वैरनिर्यातनार्थमायात एव । सिंहोपि तच्छ्रुत्वा सर्वतो दृगदेवावलोक्य मृतमुष्ट्रं परित्यज्य प्राणभयात्पलायिष्ट । चतुरकोपि शनैः शनैस्तस्योष्ट्रस्य मांसं भक्षयामास ।

---

१ Having the heart emptied or taken away. २ Having frowned. ३ The state of being the remains of what is already eaten; the state of being defiled by previous eating. ४ Surely, certainly. ५ Of the tree of injustice or inequity. दुर्नयः एव तरुः. क. ६ A herd. ७ Confused, frightened. ८ That he &c. These words are reported as if uttered by Dharmarāja with respect to the lion. ९ One thousand times such camels &c. १० With a great feeling of wounded pride. ११ Killed. Here कृ has an active sense. १२ Belonging to, attached to. १३ To wreak vengeance; to retaliate.

अतोहं ब्रवीमि परस्य पीडनं कुर्वन्निति ।

अथ दमनके गते संजीवकश्चिन्तयामास । अहो किमेतन्मया कृतं यच्छ्वपादोपि मांसाशिनस्तस्यानुगः संवृत्तः । अथवा साध्विदमुच्यते ।[1]

[3]अगम्यान्यैः पुमान्याति अमेध्यांश्च निषेवते ।
स मृत्युमुपगृह्णाति गर्भमश्वतरी यथा ॥ ३७८ ॥

तत्किं करोमि । क्व गच्छामि । यं मे शान्तिर्भविष्यति । अथवा तमेव पिङ्गलकं गच्छामि कदाचिन्मां शरणागतं रक्षति प्राणैर्न वियोजयति । यत उक्तं च[4]

धर्मार्थं यतमानमप्रहविषदो दैवाद्यदि स्युः क्वचि-
त्तत्रामामुपशान्तये सुमतिभिः कार्यो विशेषादरः ।
लोके ख्यातिमुपागतात्र सकले लोकोक्तिरेषा यतो
दग्धानां किल वह्निना हितकरः सेकोपि तस्योद्भवः ॥३७९॥

तथा च । लोकेथवा स्वनुभूतां निजकर्मपाकं
नित्यं समाश्रितवतां सुहितक्रियाणाम् ।

---

१ Though a graminivorous animal. २ अगम्यां. ३ Follower. ३ That may, who goes to those who are not worthy of being resorted to, and serves those who are not fit to be served, meets with death, just as a mule meets with death in the shape of her conception. It is a general notion that a mule dies just after delivery. ४ If misfortune should ever befall those who strive for justice by accident, talented persons should especially use justice for removing them, since this popular saying (लोकोक्ति) is known to all the world, that the lotion consisting of fire is a beneficial remedy for the burns of those who are scorched by fire. यतता = यतमानानां. लोकोक्ति. = लोकानां उक्तिः—lit. the speech of people. तस्योद्भवः = वह्निसमुद्भवः. ५ Or whatever is destined to happen whether good or evil earned by their conduct, to those people in this world who always reap the fruits of their own actions and whose actions are well-directed, does certainly happen; hence there is no cause for consideration (there is no use in considering &c.).

भावार्जितं शुभमथाप्यशुभं निकामं
यद्भावि तद्भवति नात्र विचारहेतुः ॥ ३७२ ॥

अपरं चान्यत्र गतस्यापि मे कस्यचिद्दुष्टमन्त्रस्य मांसाशिनः सकाशान्मृत्युर्भविष्यति । तद्वरं सिंहात् । उक्तं च ।

[1]महता स्पर्धमानस्य विपदेव गरीयसी ।
दन्तभङ्गोपि नागानां श्लाघ्यो गिरिविदारणे ॥ ३७३ ॥

तथा च । [2]महतापि क्षयं लब्ध्वा श्लाघ्यं नीचोपि गच्छति ।
दानार्थी मधुपो यद्वद्गजकर्णसमाहतः ॥ ३७४ ॥

एवं निश्चित्य स्खलितगतिर्मन्दं मन्दं गत्वा सिंहाश्रयमपठत् । अहो साध्विदमुच्यते ।

[3]अन्तर्लीनभुजङ्गमं गृहमिव व्यालाकुलं वा वनं
ग्राहाकीर्णमिवाभिरामकमलच्छायामनाथं सरः ।
नानादुष्टजनैरमन्यवचनासक्तैरनार्यैर्वृतं
दुःखेन प्रतिगम्यते प्रचकितैः राज्ञां गृहं वार्धिवत् ॥ ३७५ ॥

एवं पठन्दमनकोत्काकारं पिङ्गलकं दृष्ट्वा प्रचकितैः संवृतशरीरो दूरतरं प्रणामकृतिं विनाप्युपविष्टः । पिङ्गलकोपि तथाविधं तं विलोक्य दमनकवाक्यं श्रद्दधानः कोपावस्योपरि पपात । अथ सैजी-

---

१ Even calamity is more honourable to him who is rivalling with the great; even the breaking of the tusks of elephants is desirable in tearing mountains. २ Even a mean person attains praise even by meeting with destruction at the hands of the great; just as a bee (also a drunkard) who is desirous of the rutting juice (also desirous of doing charity) is struck by the ears of the elephant. ३ The abode of a king which is filled with various sorts of wicked people, and by those rude fellows who are given to telling lies, is approached by frightened people with great pain like the sea, which is like a house having snakes concealed inside, or like a forest filled with ferocious animals or like a lake abounding in alligators and contains multitudes of beautiful lotuses—The epithets in the first two lines can also be made applicable to the राज्ञां गृहं by taking the words भुजंगम &c. in different senses. अन्तर्लीनभुजंगमं. ब. वार्धि Sea (lit. वारः धीयन्ते यस्मिन् सः). ४ Startled. ५ Guarding his body.

वकः खरनखरविकर्तितपृष्ठः शृङ्गाभ्यां तदुदरमुल्लिख्य कथमपि[3] तस्मादपेतः शृङ्गाभ्यां हन्तुमिच्छन्युद्धायावस्थितः। अथ द्वावपि तौ पुष्पितपलाशनिभौ परस्परवधकाङ्क्षिणौ दृष्ट्वा करटको दमनकमाह। भो मूढमते अनयोर्विरोधं वितन्वता त्वया साधु न कृतम्। न च त्वं नीतितत्त्वं वेत्सि। नीतिविद्विरुक्तं च।

[6]कार्याण्युत्तमदण्डसाहसफलान्यायासमाध्यानि ये
बुद्ध्या संशमयन्ति नीतिकुशलाः साम्नैव ते मन्त्रिणः।
निःसारफलानि ये त्वविधिना वाञ्छन्ति दण्डोद्यमै-
स्तेषां दुर्नयचेष्टितैर्नरपतेर्गरीयते श्रीस्तुलाम ॥ ३५६ ॥

तदद्य स्वाम्यभिघातो भविष्यति तत्किं त्वदीयमन्त्रबुद्ध्या क्रियते। अथवा यदि संजीवको न वध्यते तथाप्यभव्यं यतः प्राणसंदेहान्तस्य च वधः। तन्मूढ कथं त्वं मन्त्रिपदमभिलषसि। सामेमसिद्धिं न वेत्सि। तद्वृथा मनोरथोयं ते दण्डैकचेतः। उक्तं च।

---

१ Whose back was mauled by the sharp nails (of the lion). २ Having torn or scratched. ३ Having escaped from him with difficulty. ४ Became ready to fight. ५ Resembling the blossom of the Palasa-tree, by reason of the red drops of blood with which their bodies were covered. ६ Those are really ministers versed in potities who by means of talent peacefully settle such affairs as are deserving of the highest punishment and as are to be accomplished with troubles; while the royal power is placed in the balance, that is, endangered by the imprudent actions of those who wish to accomplish worthless and insignificant affairs improperly and by means of punishment. उत्तम...निःसारफलानि येषां तानि. ब. नि ...नि-नि सारणि अल्पानि च फलानि येषां. ब. अविधिना by what is not a rule, against the rule. तुलामारोप्यते is placed in the balance, is made to totter. ७ Destruction. ८ Knowledge or power of counselling. ९ On the other hand. १० Not good. ११ His death will happen by his life being in danger. १२ Accomplishment (of an object) by peaceful means. साम्नैव सिद्धिः तृ. त. १३ Of one fond of punishment as a means to an end. दण्डाय रुचिः यस्य सः. ब.

[1]सामादिर्दण्डपर्यन्तो नयः प्रोक्तः स्वयंभुवा ।
तेषां दंडस्तु पापीयांस्तं पश्चादेव नियोजयेत् ॥ ३७७॥

तथा च । [2]साम्नैव यत्र सिद्धिर्न तत्र दण्डो बुधेन विनियोज्यः ।
पित्तं यदि शर्करया शाम्यति कोर्थः पटोलेन ॥ ३७८ ॥

तथा च । [3]आदौ साम प्रयोक्तव्यं पुरुषेण विजानता ।
सामसाध्यानि कार्याणि विक्रियां यान्ति न क्वचित् ॥३७९॥

[4]न चन्द्रेण न चौषध्या न सूर्येण न वह्निना ।
साम्नैव विलयं याति विद्वेषिप्रभवं तमः ॥ ३८० ॥

तथा यत्त्वं मन्त्रिपदमभिलषसि तदप्ययुक्तं यतस्त्वं मन्त्रभेदं न वेत्सि । यतः पञ्चविधो मन्त्रः स च कर्मणामारम्भोपायः पुरुषद्रव्यसंपद्देशकालविभागो विनिपातप्रतीकारः कार्यसिद्धिश्चेति ।

---

१ Policy is said by the self-born (Brahman) to begin with peace (सामन) and to end with punishment ; of these punishment is sinful, and one should use it afterwards (that is, when the others have failed). सामादिः and दण्डः पर्यन्तो यस्य स. ब. The order of these is साम, दान, भेद and दण्ड. These four being the remedies of accomplishing objects. २ In that case where success is to be gained only by *peace*, a wise man should not make use of *punishment*; if bile can be made to subside by sugar, what is the use of पटोल ? (A kind of cucumber called कडू पडवळ in Marāthi and used in severe cases of bilious affections). ३ A clever man should first use *peace*; (for) the business accomplishable by peace can never be spoiled (lit. changed). विजानता = विदुषेण जानता. ४ The darkness (calamity) arising from a bitter foe, is dispelled only by means of peace and not by the moon, not by shining medicinal herbs, not by the sun and not by fire. विद्वेषिप्रभवं = विद्वेषी प्रभवः यस्य तत्. ब. ५ The course or direction which a counsel should take. ६ Mantra (counsel) is of five kinds such as:—(*a*) आरंभोपाय. the remedy to be applied at the beginning, (*b*) पुरुषद्रव्यसंपद् the plenty of men and wealth, (*c*) देशकालविभाग. the proper division of place and time, (*d*) विनिपात-प्रतीकारः. the retaliation of a calamity, and (*e*) कार्यसिद्धि the accomplishment of a business. पुरुषद्रव्यस्त्रोः संपद्. ष. त्त.

मोयं स्वाम्यमात्ययोरेकतमस्य किंवा द्वयोरपि विनिपातः समुत्पद्यते[2] लघ्र : । उक्तं च,

[3]मन्त्रिणां भिन्नसंधाने भिषजां सान्निपातिके ।
कर्मणि व्यत्यये प्रज्ञा स्वस्थं को वा न पण्डितः ॥ ३८१ ॥

तन्मूर्खं नैतत्कर्तुं समर्थमस्मम् । उक्तं च ।

[4]घातयितुमेव नीचः परकार्यं वेत्ति न प्रसाधयितुम् ।
पातयितुमेव शकिनांखोरुद्धदुर्गान्नपिटम् ॥ ३८२ ॥

अथवा न ते दोषोयं स्वामिनो दोषो यस्ते वाक्यं श्रद्दधाति । उक्तं च ।

[5]नराधिपा नीचजनानुवर्तिनो
बुधैरपदिष्टन न यान्ति ये पथा ।
विशन्त्यतो दुर्गममार्गनिर्गमं
समस्तसंबाधमनर्थपञ्जरम् ॥ ३८३ ॥

तयदि त्वमस्य मन्त्री भविष्यति तदान्योप्यस्य समीपे साधुजनो न समेष्यति । उक्तं च ।

[6]गुणालयोप्यसन्मन्त्री नृपतिर्नाधिगम्यते ।
प्रसन्नम्बादुसलिलो दुष्टग्राहो यथा ह्रदः ॥ ३८४ ॥

---

१ Of one of the two, viz, the king and the minister. Here एकतम is inaccurately used for एकतर as in the Kādambari कृष्णतमा for कृष्णतरा. २ Is closely impending; Cf. संपत्ते लग्ने already explained. ३ This verse is equal to 127. ४ This verse is equal to 363. ५ Those kings, who, following the advice of the mean, do not go by the way pointed out by the wise, enter as it were, into a cage of calamities surrounded by dangers on all sides (समस्तसंबाधं) and affording no easy egress, that is, the way out of which is very difficult दुर्गम. मार्गनिर्गमः यस्मात् ब. समस्तसंबाधं-समस्ता संबाधाः यस्य. ब. ६ A king having bad ministers, though he be an abode of all virtues, is not approached, as a pond, though full of clear and sweet water, but containing wicked alligators, (is not approached). असन्मंत्री—असंत. मंत्रिणो यस्य. ब.; प्रसन्नस्वादुसलिलः—प्रसन्नश्चासौ स्वादु च सलिलं यस्य. ब. दुष्टग्राह.—दुष्टा ग्राहाः यस्मिन. ब.

तथा शिष्टजनरहितस्य स्वामिनोपि नाशो भविष्यति । उक्तं च ।

[1]चित्रास्वादकथैर्भृत्यैरनायासितकार्मुकैः ।
ये रमन्ते नृपास्तेषां रमन्ते रिपवः श्रिया ॥ ३८५ ॥

[2]तत्किं मूर्खोपदेशेन । केवलं दोषो न गुणः । उक्तं च ।

[3]नानाम्यं नमते दारु नाश्मनि स्यात्क्षुरक्रिया ।
सूचीमुख विजानीहि नाशिष्यायोपदिश्यते ॥ ३८६ ॥

दमनक आह । कथमेतत् । सोब्रवीत् ।

॥ कथा १७ ॥

अस्ति कस्मिंश्चित्पर्वतैकदेशे वानरयूथम् । तत्र कदाचिद्धेमन्तसमये सौम्यवातसंस्पर्शविषमानकलेवरं प्रवर्षद्घनधारानिपातसमाहतं न कथंचिच्छान्तिमगमत् । अथ केचिद्वानरा वह्निकणसदृशानि गुञ्जाफलानि विचित्य वह्निवाञ्छया फूत्कुर्वन्तः समन्तान्स्थुः ।

---

१ The enemies of those kings, who enjoy pleasures with such servants as are always talking of various kinds of tastes of things, and have never used their bows strenuously, always enjoy prosperity. चित्रास्वादकथा. चित्रास्वादानां कथा येषां ते. ब. अनायासित कार्मुके—अनायासित कार्मुकैः. ब. २ What is then the use of the advice of a fool? ३ A timber that cannot be bent, never bends, there will be no operation of a razor on a stone; oh needle bearked one, know that no advice is given (should be given) to one who is not a faithful pupil, that is, who will not follow it. ४ The season of the two months of मार्गशीर्ष and पौष, that is, the winter season. ५ Whose bodies were shivering with cold by the touch of strong gust of wind. It is a ब. and सौम्य ought to be असौम्य असौम्यवातसंस्पर्शेन वेपमानं कलेवरं यस्य. ६ Beaten by the rain falling down in torrents. ७ Could get no peace of mind or ease with all attempts. ८ Resembling sparks of fire वह्निकणसदृशानि. ब. ब. ९ A kind of small fruits called in Marathi गुंजा and used in weighing gold and other valuable metals. १० Blowing them (गुंजाफलानि) mistaking them for fire which they wanted to warm themselves with.

अथ सूचीमुखो नाम पक्षी तेषां तं वृथायासमवलोक्य प्रोवाच । भो भवन्तः सर्वे मूर्खतमाः । नैते बदिकणा बदिकणसदृशानि गुञ्जाफलान्येतानि । तत्किं वृथाश्रमेण । नैतस्माच्छीतरक्षा भवति । तद्विष्यतां कुश्चिन्निर्वातो वनप्रदेशो गुहा वा गिरिकन्दरं वा । अथापि साटोपो मेघो दृश्यते । अथ तेषामेकतमो वृद्धवानरस्तमुवाच । भोः किं तवानेन व्यापारेण । तदुभ्यतां । उक्तं च ।

[६]मुहूर्तविग्रहकर्माणं धृतरज्जुं पराजितम् ।
नालापयेद्विवक्षज्ञो य इच्छेच्छ्रेय आत्मनः ॥ ३८७ ॥

तथा च । [७]आस्वेटकं वृथाक्लेशं मूर्खं व्यसनसंस्थितम् ।
समालापेन यो युद्धे स गच्छति पराभवम् ॥ ३८८ ॥

सोपि तमनादृत्य भूयोपि वानरानवर्णयमाह । भोः किं वृथाक्लेशेन । अथ यावदसौ न कथंचित्पलपिण्डमिति तावदेकेन वानरेण व्यर्थश्रमत्वात्कुपितेन पक्षाभ्यां [९]गृहीत्वा शिलायामास्फालित उपरतश्च ॥

अतोहं ब्रवीमि नानार्थं नमते दाक्षिण्यादि ।

तथा च । [१०]उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ।
पयःपानं भुजङ्गानां केवलं विषवर्धनम् ॥ ३८९ ॥

---

१ Vain attempt. २ There will be no protection from cold by these, you cannot protect your-elves from cold by means of these fruits. ३ Free from wind, not exposed to wind. ४ The cave of a mountain. ५ Increasing, spreading. ६ That consideratе man who wishes for his own welfare, should not speak with him, who interrupts his actions often and often, him who is a gambler, and him who is defeated. विग्रहकर्माणि येन. ब. ७ He, who engages in conversation on equal terms with a hunter, with him whose attempts have been foiled, and a fool who is in difficulty, sustains a defeat. वृथाक्लेश-वृथा क्लेशा यस्य तं. ब. ८ Incessantly, unceasingly. ९ Did not cease talking. १० Being seized with the wings. ११ Dashed, struck. १२ The advice given to a fool irritates him and does not satisfy (him); the drinking of milk by snakes only increases their poison. पयःपानं प. त. विषवर्धनं प. त.

[1]उपदेशो न दातव्यो यादृशे तादृशे जने ।
पश्य वानरमूर्खेण सुगृही निगृहीकृता ॥ ७५० ॥

दमनक आह । कथमेतत् । सोऽब्रवीत् ।

॥ कथा १८ ॥

कस्मिंश्चिद्वने शमीवृक्षशाखालम्बितवसथं [2]कृत्वारण्यचटकदंपती प्रतिवसतः स्म । अथ कदाचिन्नयोः सुखसंस्थयोर्हेमन्तमेघो मन्दं मन्दं वर्षितुमारब्धः । अचान्तरे कश्चिच्छार्दूलमृगो वातासारसमाहतः प्रोद्धूपितशरीरो दन्तवीणां [3]वादयन्वेपमानस्तस्याः शम्या मूलमास्त-योपविष्टः । अथ तं तादृशमवलोक्य चटकः प्राह । भो भद्र ।

[4]हेमन्तपादसंपीडो दृश्यसे पुरुषाकृतिः ।
शीतेन भियसे मूढ कथं न कुरुषे गृहम् ॥ ३९१ ॥

एतच्छ्रुत्वा वानरः सकोपमाह यच्चं कर्मान्मौनव्रता न भवामि । अहो धार्ष्टर्यमस्याः । अथ मामुपहसति ।

[5]सूचीमुखि दुराचारे रे रे पण्डितवादिनि ।
नाशङ्कसे प्रज्वलन्ती तत्किमेनां न हन्म्यहम् ॥ ३९२ ॥

---

१ Advice should not be given to anyone whatever, behold, one having a good abode was deprived of it by a foolish ape. यादृश तादृश has an indefinite sense. २ Habitation or nest hanging down from the branch of a S'ami tree. Here वसथ is, I think, a misprint for अवसथ. ३ A pair of sparrows. ४ Living in a happy dwelling सुख संस्था यस्याः तस्याः. ५ The rain of हेमन्त, that is, the months of मार्गशीर्ष and पौष. ६ A monkey. ७ A gust; a shower. ८ With the body violently shaken. ९ Chattering his teeth. १० Endowed with hands and feet, you seem to have a human shape; you are troubled by cold, why fool, do you not construct a house? ११ Oh you needle-mouthed and ill-behaved one, talking like a Pandita, you do not fear to talk; why should I then not kill her? पंडितं वदतीति. The last words are not addressed to the sparrow but to the reader in general.

एवं प्रलप्य तामाह । मुग्धे किं[1] तव ममोपरि चिन्तया । उक्तं च ।

वाच्यं श्रद्दासमेतस्य पृच्छतश्च विशेषतः ।
प्रोक्तं श्रद्धाविहीनस्य अरण्यरुदितोपमम् ॥ ३९३ ॥

तत्किं बहुना तावत् । स कुलायस्थितया तयाभिहितो[2] यावत्तावच्छर्मामारुह्य ते कुठारं शतधा भङ्क्तमनयत् ॥

अतोहं ब्रवीम्युपदेशो न दातव्य इति ।

तन्मूर्खे शिक्षापितोपि[3] न शिक्षितस्त्वम् । अथवा न ते दोषोस्ति यतः साधोः शिक्षा गुणाय[4] संपद्यते नासाधोः । उक्तं च ।

[5]किं करीष्येव पाण्डित्यमस्थाने विनिवेशितम् ।
अन्धकारपतिच्छन्ने घटे दीप इवाहितः ॥ ३९४ ॥

तन्नार्थपाण्डित्यं त्वमाश्रितः । मम वचनमशृण्वन्नात्मनः शान्तिमपि न वेत्सि । उक्तं च ।

[6]अपात्मनो विनाशं गणयति न खलः परव्यसनदृष्टः ।
प्रायो मस्तकुमारो ममरमुखे नृत्यति कबन्धः ॥ ३९५ ॥

अहो साधिदमुच्यते ।

धर्मबुद्धिः कुबुद्धिश्च द्वावेतौ विदितौ मम[7] ।
पुत्रेण व्यर्थपाण्डित्यान्पिता धूमेन घातितः ॥ ३९६ ॥

दमनक आह । कथमेतत् । सोब्रवीत् ।

---

[1] What have you to do by caring for me ? [2] Advice should be given to one who has faith in the advice, and especially to one who may ask for it ; what is said to one who is void of confidence, is like a cry in the wilderness. [3] No sooner was he addressed by her than &c. [4] Taught. P. P. of the form शिक्षापय, a prākritik form from the base of शिक्ष्, the desiderative of शक्. [5] The instruction imparted to a good man tends to advantage (गुणाय). [6] What can wisdom do when it is used or employed in a wrong place, it is like a lamp placed in a pot covered over with darkness. [7] A wicked man delighted at the misery of others does not mind even his own ruin; generally when the head is severed from the trunk, the latter dances in the front of a battle. परव्यसन दृष्ट-परव्यसनेन दृष्ट. ए. ब. [8] Dharmabuddhi (one religiously inclined) and Kubuddhi (one of evil intentions)-both these are known to me; a son killed his father with smoke through vain wisdom.

॥ कथा १९ ॥

कस्मिंश्चिद्देशे धर्मबुद्धिः पापबुद्धिश्च द्वे मित्रे प्रतिवसतः । अथ कदाचित्पापबुद्धिना चिन्तितं यदहं तावन्मूर्खो दारिद्र्योपेतश्च । तदेनं धर्मबुद्धिमादाय देशान्तरं गत्वास्याश्रयेणार्थोपार्जनां कृत्वैनमपि वञ्चयित्वा सुखीभवामि । अथान्यस्मिन्नहनि पापबुद्धिर्धर्मबुद्धिं प्राह । भो मित्र वार्द्धकभावे किमात्मनश्चेष्टितं स्मरिष्यसि । देशान्तरमदृष्ट्वा कां शिष्टजनवार्तां कथयिष्यसि । उक्तं च ।

[1]देशान्तरेषु बहुविधभाषावेषादि येन न ज्ञातम् ।
भ्रमता धरणीपीठे तस्य फलं जन्मनो व्यर्थम् ॥ ३९७ ॥

तथा च । [2]विद्यां वित्तं शिल्पं तावन्नाप्नोति मानवः सम्यक् ।
यावद्व्रजति न भूमौ देशाद्देशान्तरं हृष्टः ॥ ३९८ ॥

अथ तद्वचनमाकर्ण्य प्रहृष्टमनास्तेनैव सह गुरुजनानुज्ञातः शुभेऽहनि देशान्तरं प्रस्थितः । तत्र च धर्मबुद्धिप्रभावेण भ्रमता पापबुद्धिना प्रभूततरं वित्तमासादितम् । ततश्च तौ द्वावपि प्रभूतोपार्जितवित्तौ प्रहृष्टौ स्वगृहं प्रत्यौत्सुक्येन प्रस्थितौ । उक्तं च ।

[3]प्राप्तविद्यार्थशिल्पानां देशान्तरनिवासिनाम् ।
क्रोशमात्रोऽपि भूभागः शतयोजनवद्भवेत् ॥ ३९९ ॥

---

१ Overcome by poverty. २ What exploit of yours (performed in youth) will you remember in old age? ३ Intelligence about respectable people. ४ Vain is the fruit of the existence of that man, who, while wandering on the surface of the earth, has not known the various languages and dresses &c. of different countries विचित्र-भाषावेषः आदी यस्य तत्. ५ A man does not properly acquire learning, wealth and art so long as he does not go from country to country on the earth with a delighted heart. ६ In the foreign country. ७ Who had acquired much wealth. It is a b. but one expects it to be उपार्जितप्रभूतवित्तौ. ८ To those who have acquired learning, wealth and knowledge of art, and are residing in a foreign country, the distance of even a *Kos*, will be (appear) like a hundred Yojanas. This, of course, will happen by reason of their anxiety to reach home.

अथ स्वस्थानसमीपवर्तिना पापबुद्धिना धर्मबुद्धिरभिहितः । भद्र न सर्वमेतद्धनं गृहं प्रति नेतुं युज्यते यतः कुटुम्बिनो बान्धवाश्च प्रार्थयिष्यन्ति । तदत्रैव वनेगहने क्वापि भूमौ निक्षिप्य किंचिन्मात्रमादाय गृहं प्रविशाम्यो भूयोपि प्रयोजने संजाते तन्मात्रं समेत्यास्मात्स्थानान्नेष्यावः । उक्तं च ।

न विनं दर्शयेत्प्राज्ञः कस्यचित्स्वल्पमप्यहो ।
मुनेरपि यतस्तस्य दर्शनाच्चलते मनः ॥ ४०० ॥

तथा च ।

यथामिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि ।
आकाशे पक्षिभिश्चैव तथा सर्वत्र वित्तवान् ॥ ४०१ ॥

तदाकर्ण्य धर्मबुद्धिराह । भद्र एवं क्रियताम । तथानुष्ठिते द्वावपि तौ स्वगृहं गत्वा सुखेन स्थितवन्तौ । अन्यदा च पापबुद्धिर्निशीथे तत्रागत्य सर्वं वित्तमादाय गर्तां पूरयित्वा स्वभवनं जगाम । अथान्येद्युर्धर्मबुद्धिं समेत्य प्रोवाच । भद्रे बहुकुटुम्बा वयं वित्ताभावान्मर्दीमः । तद्गत्वा ततः स्थानात्किंचिद्वित्तमानयावः । सोब्रवीत् । भद्र एवं क्रियतामिति । अथ द्वावपि गत्वा यावत्स्थानं खनतस्तावद्रिक्तभाण्डं दृष्टवन्तौ । अत्रान्तरे पापबुद्धिः शिरस्ताडयन्प्रोवाच । भो धर्मबुद्धे त्वया हृतमेतद्धनं नान्येन यतो भूयोपि गर्तापूर्णं

---

१ Will ask for it. २ In some difficult place in the forest. ३ A little. ४ When an occasion arises, when there is need. ५ Only as much as is wanted. ६ A wise man should not show his wealth, however little, to any body; since the mind even of a sage is tempted (to take it). ७ Even bit moves, that is, moves from the right path. ८ Just as flesh is devoured by the fish in water, by the beasts on land and by the birds in the air (sky), so is a rich man (deprived of his wealth) everywhere. ९ Having filled up or covered the hole made in the ground. १० Having many members in the family. बहु कुटुंब ज्यां ते. ब. १० Suffer misery. ११ Beating his head.

कृतम् । तत्प्रयच्छ मे तस्याधर्ममथवाहं राजकुले[1] निवेदयिष्यामि । स आह । भो दुरात्मन्मा मैवं वद । धर्मबुद्धिः[2] खल्वहम् । नैतच्चौरकर्म करोमि । उक्तं च ।

[3]मातृवत्परदारांश्च परद्रव्याणि लोष्ठवत् ।
आत्मवत्सर्वभूतानि यः पश्यति स पश्यति ॥ ४०२ ॥

एवं तौ द्वावपि विवदमानौ धर्माधिकारिणं गतवन्तौ प्रोचतुः परस्परं[4] दूषयन्तौ । अथ धर्माधिकरणाधिष्ठितपुरुषैर्दिव्यार्थं[5] यावन्नियोजितौ[6] तावत्पापबुद्धिराह । अहो न सम्यग्दृष्टो[7] न्यायः । उक्तं च ।

[8]विवादेन्विष्यते पत्रं पत्राभावे तु साक्षिणः ।
साक्ष्यभावाज्जनो दिव्यं प्रवदन्ति मनीषिणः ॥ ४०३ ॥

अत्र विषये मम वृक्षदेवताः[9] साक्षिभूताः सन्ति । तना एवावयोरेकतमं चौरं साधुं वा करिष्यन्ति । अथ तैः सर्वैरभिहितम । भो युक्तमुक्तं भवता । उक्तं च ।

[10]अन्यजोपि यदा साक्षी विवादे संप्रजायते ।
न तत्र विद्यते दिव्यं किं पुनर्यत्र देवताः ॥ ४०४ ॥

तदस्माकमप्यत्र विषये महत्कौतूहलमस्ति । तत्प्रत्यूषसमये[11] द्वाभ्यामस्माभिः सह तत्र वनोद्देशे गन्तव्यमिति । अथ पापबुद्धिः स्वगृहं

---

१ I shall give information of this to the king's officers. २ I am really, as my name signifies (धर्मबुद्धि), righteous-minded. ३ He, who looks upon others' wives as mothers, and on others' wealth as a lump of earth, and on all creatures as upon himself, really considers rightly or correctly परद्रव्य is used here as a neuter noun as an exceptional case. ४ Accusing each other of crime. ५ Persons appointed to the office of judge, judges. ६ Were ordered to go through an ordeal. ७ The judgments is not justly pronounced, the decision given is unjust. ८ In a dispute, first a written proof is required, in the absence of a writing, witnesses are wanted and in the absence of witnesses, an ordeal is resorted to; so say the wise. ९ In this case, in the present instance. १० Sylvan deities are my witnesses. ११ For प्रत्यूष,—inaccurately used. १२ Will declare. १३ In a dispute, when even a low-caste is coming forth as a witness, there is no ordeal required, how much more so, when there are deities themselves as witnesses. १४ At the time of early morning.

गत्वा स्वजनकमुवाच । तात प्रभूतोयं मयार्थो धर्मबुद्धेश्चोरितः । स च तव वचनेन परिणतिं यास्यति । अन्यथा मम प्राणैः सह यास्यति । म आह । कथं दत्तं वद येन प्रत्यर्प्य तद्द्रव्यं स्थिरतां नयामि । पापबुद्धिराह । तात अस्ति तत्पर्यन्ते महाशमी । तस्यां महत्कोटरमस्ति । तत्र त्वं संप्रतमेव प्रविश । ततः प्रभातेहं यदा सत्यश्रावणं करोमि तदा त्वया वाच्यं यद्धर्मबुद्धिश्चोर इति । तथानुष्ठिते प्रत्यूष पापबुद्धिः स्नात्वा धर्मबुद्धिपुरःसरो राजपुरुषैः सह तां शमीमभ्येत्य तारस्वरेण प्रोवाच ।

[1]आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च संध्ये
[2]धर्मो हि जानाति नरस्य वृत्तम् ॥ ४०५ ॥

तत्कथयत वनदेवता आवयोर्यथोरं इति । अथ पापबुद्धिपिता शमीकोटरस्थः प्रोवाच । भो धर्मबुद्धिना हृतमेतद्धनम । तदाकर्ण्य सर्वे राजपुरुषा विस्मयोत्फुल्लेक्षणा यावद्धर्मबुद्धिर्विलहरणोचितं निग्रहं शास्त्रदृष्ट्यावलोकयन्ति तावद्धर्मबुद्धिना तच्छमीकोटरं वह्निभोज्यद्रव्यैः परिवार्य वह्निना संदीपितम् । अथ ज्वलति तस्मिंश्चमीकोटरे धूमदग्धशरीरः स्फुटितदृष्टिः करुणं परिदेवयन्पापबुद्धिपिता निश्चक्राम । ततस्तैः सर्वैः पृष्टः सर्वं पापबुद्धिचेष्टितं निवेदयामास । अथ ते राजपुरुषाः पापबुद्धिं शमीशाखायां प्रतिलंब्य धर्मबुद्धिं प्रशस्येदमूचुः । अहो साध्विदमुच्यते ।

---

१ Will be secured (lit. will be ripe) । २ Go away with my life, will deprive me of life । ३ Having declared aloud. ४ Make it firm in your possession । ५ Make truth heard, declare the truth. ६ This verse is equal to 182. ७ With the eyes glistening with wonder. ८ Were considering according to law what was the punishment to be awarded to *Dharmabuddhi* adequately to his crime of theft. ९ With combustible things or materials. १० With broken eyes. ११ Having hanged.

[1]उपायं चिन्तयेत्प्राज्ञस्तथापायं च चिन्तयेत् ।
पश्यतो वकमूर्खस्य नकुलेन हता बकाः ॥ ४०६ ॥

धर्मबुद्धिः प्राह । कथमेतत् । ते प्रोचुः ।

॥ कथा २० ॥

अस्ति कस्मिंश्चिद्वनोद्देशे बहुबकसनाथो वटपादपः । तस्य कोटरे कृष्णसर्पः प्रतिवसति स्म । स च बकबालकानजातपक्षानपि सदैव भक्षयन्कालं नयति । अथैको बको भक्षितशिशुवैराग्यान्मरस्तीरमासाद्य बाष्पपूरपूर्णलोचनोधोमुखस्तिष्ठति । तं च तादृक्चेष्टितमवलोक्य कुलीरकः प्रोवाच । मामक किमेवं रुद्यते भवताय । स आह । भद्र किं करोमि । मम मन्दभाग्यस्य बालकाः कोटरनिवासिना सर्पेण भक्षिताः । दुःखितोहं तद्वियोगेन । तत्कथय मे यथास्मिं कश्चिदुपायस्तद्विनाशाय । तदाकर्ण्य कुलीरकश्चिन्तयामास । अयं तावदस्मन्सहजवैरी । तथापीदृशं प्रपञ्चयामि सत्यानृतं यथान्येपि बकाः सर्वे संक्षयमायान्ति । उक्तं च ।

[2]नवनीतसमा वाणी कृत्वा चित्तं सुनिर्दयम् ।
तथा प्रबाध्यते शत्रुः सान्वयो म्रियते यथा ॥ ४०७ ॥

आह च । मामक यथैवं तन्मत्स्यमांसशकलानि नकुलस्य बिलद्वारात्सर्पकोटरं यावत्यक्षिप्य यथा नकुलस्तन्मार्गेण गत्वा ते दुष्टसर्पं विनाशयति । अथ तथानुष्ठिते मत्स्यमांसानुसारिणा नकुलेन ते कृष्णसर्प

---

१ A wise man should think out a remedy as also an injury; while a foolish crane was looking on, the cranes were destroyed by a mangoose. २ Even before they had wings, before they were fledged. ३ Through absence of all desires consequent on the offspring being devoured. ४ Flooded or filled with. ५ Thus circumstanced. ६ Natural enemy. ७ True and false, that is, apparently true but really false. ८ Having made the words (as soft) as butter, and the heart very hard, an enemy *is so advised* (should be so advised) that he dies together with his family.

अनिहत्य तेपि तद्रक्षा यैः सर्वे बकाश्च शनैः शनैर्भक्षिताः । अतो वयं ब्रूम उपायं चिन्तयेदिति ॥

तदनेन पापबुद्धिनोपायश्चिन्तितो नापायः । तस्य प्राप्तं फलम् । एवं मूढ त्वमप्युपायश्चिन्तितो नापायः पापबुद्धिवत । तन्न चासि त्वं सज्जनः केवलं पापबुद्धिरसि ज्ञातो मया स्वामिनः प्राणसंदेहानयनात । प्रकटीकृतं त्वया स्वयमेवात्मनो दुष्टत्वं कौटिल्यं च । अथवा साधिदमुच्यते ।

यन्नादृपि कः पश्येच्छिखिनामाहारनिःसरणमार्गम ।
यदि जलदध्वनिमुदितास्त एव मूढा न नृत्येयुः ॥ ४०८ ॥

तथादि त्वं स्वामिन एनां दशां नयसि तदस्मद्विधस्य का गणना । तस्मान्ममामन्त्रेण भवता न भाव्यम । उक्तं च ।

तुलां लोहमहस्रस्य यत्र खादन्ति मूषिकाः ।
गजस्तत्र हरेच्छेघ्नो बालकं नात्र संशयः ॥ ४०९ ॥

दमनक आह । कथमेतत । सोब्रवीत ।

॥ कथा २१ ॥

अस्ति कस्मिंश्चिदधिष्ठाने जीर्णधनो नाम वणिक्पुत्रः । स च द्रव्यक्षयाद्देशान्तरगमनमनसा व्यचिन्तयत ।

यत्र देशाधमे स्थाने भोगान्भुक्ता स्ववीर्यतः ।
तस्मिन्विभवहीनो यो वसन्स पुरुषाधमः ॥ ४१० ॥

---

१ Residing on that tree. २ Nor are you good-hearted. ३ By endangering the life of your lord. ४ Crookedness. ५ Who can know, even with efforts, the way by which peacocks go out for seeking prey, if those fools delighted at the thunder of the clouds, do not dance. आहार &c. आहारार्थं निःसरणमार्गं जलद ध्वनि &c. न. त. ६ What account will you make of us? Of what account are persons like us? ७ You should not be near me. ८ In the case where mice eat the weight of a thousand (lbs.) of iron, oh king, there is no doubt that a crane can take away the child. ९ Of declined wealth. जीर्ण धनं यस्य. ब. व. १० That man is the worst of men who resides, when without wealth, even in that place or country where he has enjoyed pleasures through his own valour.

तथा च । [1]येनाहंकारयुक्तेन चिरं विलसितं पुरा ।
दीनं वदति तत्रैव यः परेषां स निन्दितः ॥ ४११ ॥

तस्य च गृहे लोहभारैर्घटिता पूर्वपुरुषोपार्जिता तुलासीत् । तां च कस्यचिद्वणिजो गृहे निक्षेपभूतां कृत्वा देशान्तरं प्रस्थितः । ततः सुचिरं कालं देशान्तरं भ्रान्त्वा पुनस्तदेव स्वपुरमागत्य तं श्रेष्ठिनमुवाच । भोः श्रेष्ठिन्दीयतां मे सा निक्षेपतुला । स आह । भो नास्ति सा त्वदीया तुला । मूषिकैर्भक्षिता । जीर्णधनं आहुः । भोः श्रेष्ठिन्नास्ति दोषस्ते यदि मूषिकैर्भक्षितेति । [2]ईदृगेवंसंसारः । न किंचिदत्र शाश्वतमस्ति । परमहं नद्यां स्नानार्थं गमिष्यामि । तत्त्वमात्मीयं शिशुमेनं मया सह स्नानोपकरणहस्तं प्रेषयेति । सोपि चौर्यभयात्तस्य शङ्कितः स्वपुत्रमुवाच । वत्स पितृव्योयं तव स्नानार्थं नद्यां यास्यति । तद्गम्यतामनेन सार्धं स्नानोपकरणमादायेति । अहो साध्विदमुच्यते ।

[3]न भक्त्या कस्यचित्कोपि प्रियं प्रकुरुते नरः ।
मुक्त्वा भयं प्रलोभं वा कार्यकारणमेव वा ॥ ४१२ ॥

तथा च । [4]अत्यादरो भवेद्यत्र कार्यकारणवर्जितः ।
तत्र शङ्का प्रकर्तव्या परिणामे सुखावहा ॥ ४१३ ॥

---

१ That man is censurable in the eyes of others who speaks piteously in that very place where he has before enjoyed pleasures, being full of self-pride. २ Made of many weights of iron, that is, made of iron weighing many lbs &c. ३ Having kept as a deposit. ४ The balance kept as a deposit. It is a क. निक्षेप इव तुला. ५ Such is the world. ६ Carrying in his hands the materials of bathing. स्नानस्य उपकरणानि. ष. त. तानि हस्ते यस्य सः. ७ Being afraid of him through the fear of the theft committed. ८ No body does any good to another through mere devotion, except through fear, avarice or a motive to accomplish some object. कार्यकारण–कार्यस्य कारणं. ष. त. कार्यकारण may also mean cause and effect. ९ In that place where there is great respect shown without any particular motive for accomplishing an object, there a doubt should be entertained as it is beneficial in the end. सुखावहा-सुखं आहरतीति. उप.

अथासौ वणिक्शिशुः स्नानोपकरणमादाय प्रहृष्टमनास्तेनाभ्यागतेन सह प्रस्थितः । तथानुष्ठिते वणिक्स्नात्वा ते शिशुं नदीगुहायां प्रक्षिप्य तद्वारं बृहच्छिलयाच्छाद्य सत्वरं गृहमागतः । दृष्ट्वा तेन वणिजा भो अभ्यागत तत्कथ्यतां कुत्र मे शिशुर्यस्त्वया सह नदीं गत इति । स आह । नदीतटात्स श्येनेन हृत इति । श्रेष्ठ्याह । मिथ्यावादिन्किं क्वचिच्छ्येनो बालं हर्तुं शक्नोति । तत्समर्पय मे सुतमन्यथा राजकुले निवेदयिष्यामीति । स आह । भोः सत्यवादिन्यथा श्येनो बालं न नयति तथा मूषिका अपि लोहभारघटितां तुलां न भक्षयन्ति । तदर्पय मे तुलां यदि दारकेण प्रयोजनम् । एवं विवदमानौ द्वावपि राजकुलं गतौ । तत्र श्रेष्ठी तारस्वरेण प्रोवाच । भो अत्रह्मण्यमब्रह्मण्यम् । मम शिशुरनेन चौरेणापहृतः । अथ धर्माधिकारिणस्तमूचुः । भोः समर्प्यतां श्रेष्ठिसुतः । स आह । किं करोमि । पश्यतो मे नदीतटाच्छ्येनेनापहृतः शिशुः । तच्छ्रुत्वा ते प्रोचुः । भो न सत्यमभिहितं भवता । किं श्येनः शिशुं हर्तुं समर्थो भवति । स आह । भो भोः श्रूयतां मद्वचः ।

तुलां लोहसहस्रस्य यत्र खादन्ति मूषिकाः ।
राजंस्तत्र हरेच्छ्येनो बालकं नात्र संशयः ॥ ४१४ ॥

ते प्रोचुः । कथमेतत् । ततः श्रेष्ठी सभ्यानामादितः सर्वं वृत्तान्तं निवेदयामास । तच्चैर्विहस्य द्वावपि तौ परस्परं संबोध्य तुलाशिशुप्रदानेन संतोषितौ ॥

अतोऽहं ब्रवीमि तुलां लोहसहस्रस्येति ।

तन्मूर्खं संजीवकप्रसादमसहमानेन त्वयैतत्कृतम् । अहो साध्विदमुच्यते ।

---

१ Guest. २ In a cave inside the river. ३ If you want your son. ४ From the beginning. ५ By restoring the balance and the son respectively. ६ Not bearing the favour shown (by the lion) to Sanjivaka.

[1]श्वपचेनापि कुलान्वितं कुकुलजाः श्रीवल्लभं दुर्भगा
दातारं कृपणा ऋजूनृजवो विद्यान्वितं निर्धनाः ।
वैरूप्योपहताश्च कान्तवपुषं धर्माश्रयं पापिनो
नानाशास्त्रविचक्षणं च पुरुषं निन्दन्ति मूर्खा जनाः ॥ ४१५ ॥

तथा च । [2]मूर्खाणां पण्डिता द्वेष्या निर्धनानां महाधनाः ।
व्रतिनः पापशीलानामसतीनां कुलस्त्रियः ॥ ४१६ ॥

तन्मूर्ख त्वया हितमप्यहितं कृतम् । उक्तं च ।
[3]पण्डितोपि वरं शत्रुर्न मूर्खो हितकारकः ।
वानरेण हतो राजा विप्राश्चौरेण रक्षिताः ॥ ४१७ ॥

दमनक आह । कथमेतत् । सोब्रवीत् ।

॥ कथा २२ ॥

कस्यचिद्राज्ञो नित्यं वानरोतिभक्तिपरोङ्गसेवैकोन्नः[4]प्रीत्यप्रतिविद्धप्रसरोतिविश्वासस्थानमभूत् । एकदा राज्ञो निद्रां गतस्य वानरो व्यजनं नीत्वा वायुं[5]विदधति राज्ञो वक्षःस्थलोपरि मक्षिकोपविष्टा । व्यजनेन मुहुर्मुहुर्निषिध्यमानापि पुनःपुनस्तत्रैवोपविशति । ततसेन स्वभावचपलेन मूर्खेण वानरेण क्रुद्धेन सता तीव्रं खड्गमादाय तस्यां उपरि

---

१ Generally in this world, those born in a low family calumniate those who are nobly born, the unfortunate the fortunate, misers a generous man, the crooked the straightforward, the poor the rich, those who are deformed the handsome, sinful the religious, and the foolish censure those who are well-versed in various sciences. श्रीवल्लभ-प्रियः वल्लभं the favourite of the goddess of wealth. २ The wise are an object of hatred to the foolish, the rich to the poor, those, who are devoted to religious observances, to the sinful, and virtuous women to the debauched ones. महाधनाः. ब. पापशीलानां छोरिं वेषां ते. ब. ३ An enemy, that is wise, is preferable even to a friend (हितकारक) who is foolish; a king was killed by a monkey, while Brâhmans were saved by a thief. ४ Greatly attached, अतिभक्तिः पर्व यस्य. ब. ५ A personal attendant. ६ Not forbidden access even to the women's apartments. ७ Was fanning him with a fan (taking a fan). ८ Mischievously inclined by nature. ९ On the fly (राजस्य).

प्रहारो विहितः । ततो मक्षिकोड्डीय मानता परं तेन शितधारेणासिना राज्ञो वक्षो द्विधा जातं राजा मृतश्च । तस्माच्चिरायुरिच्छता नृपेण मूर्खोनुचरो न रक्षणीयः ॥ अपरमेकस्मिन्नगरे कोपि विप्रो महाधनाढ्योन्यं पूर्वजन्मयोगेन चौरो वर्तते । तस्मिन्पुरेन्यदेशादागतांश्चतुरो विप्रान्वहूनि वस्तूनि विक्रीणतो दृष्ट्वा चिन्तितवान् । अहो कोपायेनैषां धनं लुभे । इति विचिन्त्य तेषां पुरोनेकानि शास्त्रोक्तानि सुभाषितानि चातिप्रियाणि मधुराणि वचनानि जल्पता तेषां मध्यात् विश्वासमुत्पाद्य सेवा कर्तुमारब्धा । अथवा साध्विदमुच्यते ।

असती भवति सलज्जा क्षारं नीरं च शीतलं भवति ।
दम्भो भवति विवेकी प्रियवक्ता भवति धूर्तजनः ॥४१८॥

अथ तस्मिन्सेवां कुर्वति तैर्विप्रैः सर्ववस्तूनि विक्रीय बहुमूल्यानि रत्नानि क्रीतानि । ततस्तानि जङ्घामध्ये तत्समक्षं प्रक्षिप्य स्वदेशं प्रतिगन्तुमुपक्रमो विहितः । ततः स धूर्तविप्रस्तान्विप्रान्गन्तुमुपतान्प्रेक्ष्य चिन्ताव्याकुलितमनाः संजातः । अहो धनमेतन्मे किंचिन्मम चेष्टितम् । अधीभिः सह यामि । पथि क्वापि विषं दत्त्वैतानिहत्य सर्वरत्नानि गृह्णामि । इति विचिन्त्य तेषामग्रे सकरुणं विलप्येदमाह । भो मित्राणि यूयं मामेकाकिनं मुक्त्वा गन्तुमुद्यताः । तन्मे मनो भवद्भिः सह नेदानीं वर्तते भवद्विरहनाम्नैवाकुलं संजातं यथा धृतिं कापि न धत्ते । तदहं यूथमनुप्रपद्य विधाय सहायभूतं मामपि सहैव नयत । तद्वचः श्रुत्वा ते करुणार्द्रचित्तास्तेन समभेव स्वदेशं प्रति प्रस्थिताः । अथाध्वनि तेषां पञ्चानामपि पल्लीपुरमध्ये व्रजतां ध्वाङ्क्षैः कथयितुमारब्धाः ॥

---

१ Was made, dealt (दत्तः). २ Having a sharp edge. शिता धारा यस्य. ब. ३ A king desirous of long life. ४ By the force of sin committed in the previous existence. ५ Acc. Plu. of the Pre. P. of श्री 9 P. with वि. ६ An unchaste woman is bashful (affects to be modest), salt water is cool, a hypocrite affects to be considerate, and a roguish person talks sweetly. इव here means a hypocrite person and not hypocrisy. ७ The thigh. ८ Obtained by me. ९ Mind full of dejection at the very mention of separation from you. १० Takes no courage anywhere. ११ The name of a town. १२ Crows.

रे रे किराता धावत धावत । सपादलक्षधनिनो यान्ति । एतान्निहत्य धनं नयत । ततः किरातैर्ध्वाङ्क्षवचनमाकर्ण्य सत्वरं गत्वा ते विप्रा लगुडप्रहारैर्जर्जरीकृत्य वस्त्राणि मोचयित्वा विलोकितैः परं धनं किंचिन्न लब्धम् । तदा तैः किरातैरभिहितम् । भोः भ्रान्थाः पुरा कदापि ध्वाङ्क्षवचनमनृतं नासीत् । ततो भवता संन्निधौ क्वापि धनं विद्यते तदर्पयत । अन्यथा सर्वेषामपि वधं विधाय चर्म विदार्य प्रत्यङ्गं प्रेक्ष्य धनं नेष्यामः । तदा तेषामीदृशं वचनमाकर्ण्य चौरविप्रेण मनसि चिन्तितम् । यदेषां विप्राणां वधं विधायाङ्गं विलोक्य रत्नानि नेष्यन्ति तदापि मां वधिष्यन्ति ततोऽहं पूर्वमेवात्मानमर्रत्नं समर्प्यैतान्मुञ्चामि । उक्तं च ।

भृत्योर्बिभेषि किं बाल न स भीरुं विमुञ्चति ।
अद्य वाब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः ॥ ४१९ ॥

तथा च । गवार्थे ब्राह्मणार्थे च प्राणत्यागं करोति यः ।
सूर्यस्य मण्डलं भित्त्वा स याति परमां गतिम् ॥४२०॥

इति निश्चित्याभिहितम् । भोः किराता यद्येवं ततो मां पूर्वं निहत्य विलोकयत । ततस्तैस्तथानुष्ठिते तं धनरहितमवलोक्यापरे चत्वारोपि मुक्ताः ॥

अतोहं ब्रवीमि पण्डितोपि वरं शत्रुरिति ।

अथैवं संवर्दतोस्तयोः संजीवकः क्षणमेकं पिङ्गलकेन सह युद्धं कृत्वा तस्य खरनखरप्रहाराभिहतो गतासुर्वसुंधरापीठे निपपात । अथ

---

१ Savages, barbarians. २ Persons possessing wealth to the amount of a lac and a quarter. ३ Having defeated. ४ Searched ५ Having searched every limb. ६ Without jewels, or valuables. ७ Having surrendered (myself). ८ Child, why do you fear death? He does not spare him who fears him (death). Death is sure to overtake mortals either to-day or at the end of a hundred years. अब्दशत. अब्दानां शतं. ष.त. ९ He, who gives up his life for the sake of cows, and Brahmans, goes to the highest place after having penetrated through the orb of the sun. १० While they (two) were thus wrangling or disputing.

तं गतासुमवलोक्य पिङ्गलकस्तृणस्मरणार्द्रहृदयः प्रोवाच । भो अयुक्तं मया पापेन कृतं संजीवकं व्यापादयता यतो विश्वासघातादन्यन्नास्ति पापतरं कर्म । उक्तं च ।

[3]मित्रद्रोही कृतघ्नश्च यश्च विश्वासघातकः ।
ते नरा नरकं यान्ति यावच्चन्द्रदिवाकरौ ॥ ४२१ ॥

तथा मया सभामध्ये स सदैव प्रशंसितः । तत्किं कथयिष्यामि तेषामग्रतः । उक्तं च ।

[4]उक्तो भवति यः पूर्वं गुणवानिति संसदि ।
न तस्य दोषो वक्तव्यः प्रतिज्ञाभङ्गभीरुणा ॥ ४२२ ॥

एवंविधं प्रलपन्तं दमनकः समेत्य सहर्षमिदमाह । देव कातरैतन्मस्तवैष न्यायो यद्द्रोहकारिणं शष्पभुजं हन्वेत्यं शोचसि । तन्नैतदुपपन्नं भूभुजाम । उक्तं च ।

[5]पिता वा यदि वा भ्राता पुत्रो भार्याथवा सुहृत् ।
प्राणद्रोहं यदा गच्छेत्तं घ्नता नास्ति पातकम ॥ ४२३ ॥

तथा च ।

[6]राजा घृणी ब्राह्मणः सर्वभक्षी
स्त्री चावशा दुष्टमतिः सहायः ।
प्रेष्यः प्रतीपोधिकृतः प्रमादी
त्याज्या अमी यश्च कृतं न वेत्ति ॥ ४२४ ॥

---

१ With his heart melted with pity by remembering his merits. २ More sinful or wicked. ३ A man, who kills his friend, who is ungrateful, and who breaks faith with others—these men go to hell and remain there so long as there are the moon and sun (that is, perpetually). ४ This verse is equal to 244. ५ This your judgment is the most cowardly. ६ There is no sin in killing either a father, brother, son, wife or friend; when he or she conspires against one's life. ७ These seven, viz., a merciful king, a Brâhmana eating all, that is, voracious, a wife that is not under proper control, a wicked-minded companion, a servant going against one's wishes, a careless officer and one who does not recognize what is done and one who is ungrateful—should be abandoned. प्रतीप lit. against the current of water (प्रति—इ् from अप्) and hence going against &c.

अपि च ।

[1]सत्यानृता च परुषा प्रियवादिनी च
हिंस्रा दयालुरपि चार्थपरा वदान्या ।
भूरिव्यया प्रचुरवित्तसमागमा च
वेश्याङ्गनेव नृपनीतिरनेकरूपा ॥ ४९५ ॥

एवं तेन संबोधितः पिङ्गलकः संजीवकशोकं [2]त्यक्त्वा दमनक साचिव्येन राज्यमकरोत् ॥

॥ समाप्तं चेदं [3]मित्रभेदं नामं प्रथमं तन्त्रम् ॥

---

१ Royal policy is of various forms like a harlot, viz., it is true, false, harsh, sweet-speaking, cruel, compassionate, intent on acquiring wealth, bountiful, extravagant and associating with one having much wealth. All these adjectives apply equally to a *king* and a harlot. २ Sorrow for the death of Sanjivaka. ३ Here ends this first Tantra entitled मित्रभेद.

TWO-THIRDS OF THE EDITION IS ALREADY EXHAUSTED.

THE STANDARD
Sanskrit-English Dictionary

BY

L. R. VAIDYA, M. A., LL. B.

(Sanctioned by the Department of Public Instruction for use in High Schools.)

Neat and strongly bound, cheap, handy, well-printed and above all, compendious and reliable, the Dictionary has only to be seen and the temptation to buy it is overpowering. It is a bargain for a life-time for it contains all that you are likely to want in your Sanskrit studies. The author has spared no pains to make the work a standard book of reference for our schools and colleges. Neatness and compactness of arrangement, copious references and original quotations selected by the author himself from classical works usually studied in our schools and colleges, accuracy in giving the various meanings and shades of meanings, the biographical appendix, and the other on metre make the work an altogether indispensable one for the study of the Sanskrit language.

The Chief Points of Merit of this Dictionary,

AS NOTICED BY THE VARIOUS LEARNED CRITICS WHO HAVE REVIEWED THE WORK.

(1) The book is not a *mere compilation.*

(2) It contains not only the results of the *best* and *latest efforts of Lexicographers* but a great deal of *original work.*

अपि च ।

[1]सत्यानृता च परुषा प्रियवादिनी च
हिंस्रा दयालुरपि चार्थपरा वदान्या ।
भूरिव्यया प्रचुरवित्तसमागमा च
वेश्याङ्गनेव नृपनीतिरनेकरूपा ॥ ४२५ ॥

एवं तेन संबोधितः पिङ्गलकः संजीवकशोकं [2]त्यक्त्वा दमनक साचिव्येन राज्यमकरोत् ॥

॥ समाप्तं चेदं मित्रभेदं नामं प्रथमं तन्त्रम् ॥

---

१ Royal policy is of various forms like a harlot, viz., it is true, false, harsh, sweet-speaking, cruel, compassionate, intent on acquiring wealth, bountiful, extravagant and associating with one having much wealth. All these adjectives apply equally to a *king* and a harlot. २ Sorrow for the death of Sanjivaka. ३ Here ends this first Tantra entitled मित्रभेद.

TWO-THIRDS OF THE EDITION IS ALREADY EXHAUSTED.

THE STANDARD
Sanskrit-English Dictionary

BY

L. R. VAIDYA, M. A., LL. B.

(Sanctioned by the Department of Public Instruction for use in High Schools.)

Neat and strongly bound, cheap, handy, well-printed and above all, compendious and reliable, the Dictionary has only to be seen and the temptation to buy it is overpowering. It is a bargain for a life-time for it contains all that you are likely to want in your Sanskrit studies. The author has spared no pains to make the work a standard book of reference for our schools and colleges. Neatness and compactness of arrangement, copious references and original quotations selected by the author himself from classical works usually studied in our schools and colleges, accuracy in giving the various meanings and shades of meanings, the biographical appendix, and the other on metre make the work an altogether indispensable one for the study of the Sanskrit language.

The Chief Points of Merit of this Dictionary,

AS NOTICED BY THE VARIOUS LEARNED CRITICS WHO HAVE REVIEWED THE WORK.

(1) The book is not a *mere compilation.*

(2) It contains not only the results of *the best and latest efforts of Lexicographers* but a great deal of *original work.*

(3) Many of the references are the *author's own* being taken directly from the books which are usually read by the most successful students of Sanskrit.

(4) The different *senses of words* are well arranged and given *clearly* and *accurately* and the work is thus a *reliable guide*.

(5) It is eminently qualified for the use of the pupils of Schools and Colleges.

(6) The *biographical appendix* is a novel feature, very *interesting* and very *valuable*.

(7) Comprehensiveness of matter; compactness of size; and modesty of price.

(8) For classical works of the *post-Vedic* literature the *Dictionary* may be *used* with *singular benefit* and *success*.

(9) The work deserves to be the *Standard* Dictionary of the class intended for Schools and Colleges.

The Dictionary contains quotations and references, mythological and other allusions, idiomatic expressions and their uses, choice English equivalents, in short all that a student wants; and it is confidently expected that so far as the study of the Classical Sanskrit works in our Schools and Colleges is concerned, the *Standard Sanskrit-English Dictionary* is a work which the students of Sanskrit cannot afford to dispense with.

Bound in Cloth Price Rs. 3, Postage Ans. 10.

Bound in Half-Leather Price Rs. 4, Postage Ans. 10.

Apply to

MR. RAMCHANDRA GOVIND,

MANAGER, MRS. RADHABAI ATMARAM SAGOON,

Bookseller & Publisher, Kalbadevi Road, BOMBAY.

Or to

MR. HARI NARAYAN GOKHALE,

MANAGER, ARYA-BHUSHANA PRESS, POONA.